र्तस्य टो भवति। पअट्टइ प्रवर्तते। केअट्टो कैवर्तः। वट्टी वर्तिः। वट्टा वर्त्म। जुट्टा जुर्तः। णट्टई नर्तकी। **णच्चणीई[6] ।चविधानात् ॥ स्यस्तयोरपि वा टत्वं क्रियते क्वापि शाब्दिकैः ॥** पल्लट्टंतो पर्यस्यन्। टाभावपक्षे पल्लस्संतो। **व्यवस्थित-विभाषया क्वापि टादेशाभावः।** विल्लस्संतो विन्यस्यन्। पल्लट्टो पल्लत्थो पर्यस्तः ॥

मृत्तिका-पत्तनयोश्च ॥२२॥

एतयोः शब्दयोर्युक्तस्य टो भवति। मट्टिआ मृत्तिका। पट्टणं पत्तनम् ॥

---

1 Not found in B. 2 A. आर्येत्यादि।

3 B. सौन्दर्येषु(It is wrongly put; because in the vṛtti the example of सौकुमार्य is given).

4 B पल्लट्ठन्ति 5 Not found in B.

6 Emended by me. A णाच्चनीतिः चविधानात्; B णाच्चनोति चविधानात् ॥

न धूर्तादिषु[1] ॥२३॥

धूर्तशब्द-प्रभृतिषु तस्य स्थाने टो न भवति[2]। धुत्तो धूर्तः। मुत्तं मूर्तम्। मुहुत्तं मुहूर्तम्। कत्तरी कर्तरी। आवत्तो आवर्तः। कित्ती कीर्तिः। वत्ता वार्ता। अत्तो आर्तः। भत्तारो[3] भर्ता। कत्तारो कर्ता॥ धूर्त-मूर्त-मुहूर्त-कर्तरी-आवर्त-कीर्ति-वार्ता-आर्त-भर्तृ-कर्तृ इत्यादि॥

गर्ते डः ॥२४॥

गर्तशब्दे र्तस्य डो भवति। गड्डो गर्तः॥

गर्दभ संमर्द-वितर्दि-विच्छर्दिषु र्दस्य वा ॥२५॥

एषु चतुर्षु र्दस्य स्थाने डो वा स्यात्[4]। गड्डहो गद्दहो गर्दभः। संमड्डो संमद्दो संमर्दः। विअड्डी विअद्दी वितर्दिः। विच्छड्डी विच्छद्दी विच्छर्दिः॥

त्य-थ्य-द्यां च-छ-जाः ॥२६॥

त्य-थ्य-द्य इत्येतेषां स्थाने यथाक्रमं[5] च-छ-ज इत्येते आदेशा भवन्ति। **तस्य**॥ पच्चक्खो प्रत्यक्षः। मच्चलोओ मर्त्यलोकः। **थस्य**॥ रच्छा रथ्या। मिच्छा मिथ्या। पच्छा पथ्या। णेपच्छो नेपथ्यः। **द्यस्य**॥ अज्ज अद्य। विज्जा[6] विद्या। जूअं द्यूतम्। मज्जं मद्यम्। पडिअज्जइ प्रतिपद्यते। **यथाप्राप्तो यलोपोऽपि त्य-थ्य-द्यां क्वापि दृश्यते**॥ अत्तओ अत्ययः। वत्तासो व्यत्यासः। सामत्थं सामर्थ्यम्। आइत्थं आतिथ्यम्। गद्दं गद्यम्॥ पद्दं पद्यम्। सुवद्दं[7] सुवद्यम्॥

ध्य-ह्ययो र्झः ॥२७॥

ध्य-ह्य इत्येतयोः स्थाने झकारादेशो वा[7] भवति। संझा सन्ध्या। वंझा बन्ध्या। सज्झं सह्यम्। गुज्झं[7] गुह्यम्। संणज्झइ संनह्यते। मुज्झइ मुह्यति। **बाहुल्यात् साध्वसे ध्वस्य वा**। सज्झसं साध्वसम्।

---

1 Not found in B.
2 A सम्पद्यते।
3 From here upto वार्ता—not found in B.
4 B भवति.
5 Not found in B.
6 Not found in A.
7 Not found in A.

ष्क-स्क-क्षां खः ॥२८॥

ष्क-स्क-क्ष इत्येतेषां स्थाने खो भवति। ष्कस्य॥ सुक्खं शुष्कम्। बाहुल्यात् ष्कस्य वा। सुक्कं। एवं पोक्खरं पोक्करं। णिक्खओ णिक्कओ निष्कयः। क्वचिन्न स्यात्। दुक्करं णिक्कम्पं दुष्कर-निष्कम्पयोः। स्कस्य क्वचिद्वा। खन्दो कन्दो स्कन्धः। क्वचिन्नैव खः। सक्कअं संस्कृतम्। सक्कारो संस्कारः। तक्करो तस्करः। णमक्कारो नमस्कारः। क्षस्य॥ जक्खो यक्षः। रक्खसो राक्षसः॥

अक्ष्यादिषु छः[1] ॥२९॥

अक्ष्यादिषु क्षस्य[2] छो[3] भवति। अच्छीइं[4] अक्षीणि। छीरं क्षीरम्। छुरो क्षुरः। छेत्तं क्षेत्रम्। छारं क्षारम्। कुच्छी कुक्षिः उच्छू इक्षुः। मच्छिआ मक्षिका। रिच्छो ऋक्षः। लच्छी लक्ष्मी। छुहा क्षुधा। दच्छो दक्षः॥ अक्षि-क्षीर-क्षुर-क्षेत्र-क्षार-कुक्षि-इक्षु-मक्षिका-ऋक्ष-लक्ष्मी-क्षुधा-दक्षोऽक्षाद्या एवमादयः॥

क्षमा-वृक्ष-क्षणेषु वा ॥३०॥

क्षमा-वृक्ष-क्षण इत्येतेषु क्षस्य छो वा[5] भवति[6]। छमा क्षमा। खमा इति केचित्। वच्छो रुक्खो वृक्षः। छणो खणो क्षणः॥

यत्रात्वं तत्र वृक्षे छः खत्वं तत्र तु यत्र रुः।
उत्सवार्थे क्षणे छत्वं मुहूर्तार्थे तु खो भवेत्॥

ष्म-पक्ष्म-विस्मयेषु म्हः ॥३१॥

एषु त्रिषु युक्तस्य[7] वर्णस्य स्थाने म्हो भवति। गिम्हो ग्रीष्मः। पम्हो पक्ष्मः। विम्हओ विस्मयः॥

---

1 Not found in AB. Given by me.

2 Not found in A. But B has खस्य probably for क्षस्य।

3 B has च्छो भवति।

4 B अच्छीइं.

5 Not found in A.

6 B स्यात्.

7 B has युक्तवर्णस्थाने.

ह्न-स्न-ष्ण-क्ष्ण-श्नां ण्हः ॥३२॥

एषां पञ्चानां युक्तानां स्थाने ण्हो भवति। **ह्नस्य** ॥ जण्हवी जाह्नवी। णिण्हवो निह्नवः। **स्नस्य** ॥ जोण्हा ज्योत्स्ना। ण्हाणं स्नानम्। **ष्णस्य** ॥ विण्हू विष्णुः। जिण्हू जिष्णुः। **क्ष्णस्य** ॥ तिण्हं तीक्ष्णम्। **तीव्रार्थं तीक्ष्णशब्दे ण्हो निशितार्थे तु ख्खो भवेत्** ॥ सण्हं श्लक्ष्णम्। **श्नस्य** ॥ पण्हो प्रश्नः। अण्हन्तो अश्नन् ॥

चिह्ने ण्णः ॥३३॥

चिह्नशब्दे ह्नस्य ण्ण[1] इत्यादेशो भवति। चिण्णं चिह्नम् ॥

ष्पस्य फः ॥३४॥

ष्पस्य फो भवति।[2] पुप्फं पुष्पम्। सप्फं शष्पम्। णिप्फवो निष्पापः। णिप्फण्णो निष्पन्नः। **श्लेष्मशब्दे तु फादेशः[3] ष्म इत्यस्य प्रचक्षते।** सेप्फा श्लेष्मा ॥

स्पस्य ॥३५॥

स्पस्य फादेशो भवति। फंसो स्पर्शः। फंदो स्पन्दः। फद्दा स्पर्द्धा। **क्वचित् सस्य क्वचित् पस्य लोपः स्पशब्द इष्यते ॥ सस्य** ॥ परोप्परं परस्परम्। वणप्पतिः वनस्पतिः। **पस्य** ॥ सिंहइ स्पृहयति। **छादेशोऽपि स्पशब्दस्य क्रियते पण्डितैः क्वचित्** ॥ छिहा स्पृहा ॥

बाष्पेऽश्रुणि हः ॥३६॥

बाष्पशब्देऽश्रुण्यभिधेये ष्पस्य हादेशो[4] भवति। बाहो बाष्पः[5]। अश्रुणीति किम्? बप्फो। **क्वचिद् दक्षिणशब्दस्य क्षस्य हादेश[6] इष्यते।** दाहिणो दक्षिणः। क्वचिदिति किम्? दक्खिणो दक्षिणः। दक्खिण्णं दाक्षिण्यम् ॥

---

1 ण्णादेशो।

2 A omits this vṛtti.

3 B. ष्फादेशः।

4 B. हः स्यात्।

5 Not found in A.

6 B. स्यात्।

कार्षापणे ॥३७॥

कार्षापणशब्दे युक्तस्य हकारादेशो भवति ॥ काहावणो ।

श्च-त्स-प्सां छः ॥३८॥

एषां छो भवति । श्चस्य ॥ णिच्छओ निश्चयः । पच्छिमो पश्चिमः । त्सस्य ॥ वच्छो वत्सः । उच्छाहो उत्साहः । प्सस्य ॥ लिच्छा लिप्सा । जुउच्छा जुगुप्सा । क्वचिन्न स्यात् । णिच्चलो निश्चलः । क्वचिद्वा स्यात् । उसित्तो उच्छित्तो उत्सिक्तः । क्वचिदन्यत्रापि । सारिच्छं सादृश्यम् ॥

वृश्चिके ञ्छः ॥३९॥

वृश्चिकशब्दे श्चस्य ञ्छादेशो भवति[1] । विञ्छुओ वृश्चिकः ॥

नोत्सुकोत्सवयोः ॥४०॥

उत्सुकोत्सवयोः शब्दयोः छादेशो[2] न भवति ॥ ऊसुओ उत्सुकः । ऊसवो उत्सवः ॥

न्मो मः ॥४१॥

न्म इत्यस्याक्षरस्य मकारादेशो[3] भवति । वम्महो मन्मथः । उम्माओ उन्मादः । सम्मग्गो सन्मार्गः । जम्मो जन्म ॥

म्न-ज्ञ-पञ्चाशत्-पञ्चदशसु णः ॥४२॥

म्न-ज्ञ इत्येतयोरक्षरयोः पञ्चाशत्-पञ्चदश इत्येतयोश्च शब्दयोर्युक्तस्य स्थाने णो भवति । म्नस्य ॥ पज्जुण्णो प्रद्युम्नः । णिण्णआ निम्नगा । ज्ञस्य ॥ अहिण्णाणं अभिज्ञानम् । विण्णाणं विज्ञानम् । पण्णासा[4] पञ्चाशत् । पण्णरह पञ्चदश ॥

तालवृन्ते ण्टः[5] ॥४३॥

तालवृन्त-शब्दे युक्तवर्णस्य ण्टादेशः स्यात् । तालवेंटं तालवृन्तम् ॥

---

1 B स्यात् । 2 B. इत्येतयोश्छादेशो भवति न ।

3 B. मः स्यात् । 4 A omits these two examples.

5 A omits these two (43-44) sūtras along with their vṛttis.

वृन्तशब्दस्य प्राधान्येनाभिप्रेतत्वात् तालोपपदं विनापि ण्टादेशः स्यात्। वेण्टं वृन्तम् ॥

भिन्दिपाले ण्डः ॥४४॥

भिन्दिपाल-शब्दे युक्तस्य ण्डादेशः स्यात्। भिंडिबालो भिन्दिपालः ॥

विह्वलो भो वा ॥४५॥

विह्वलशब्दे युक्तस्य भादेशो वा भवति। भिब्भलो विहलो विह्वलः ॥ क्वचिदन्यत्रापि। गोइब्भा गोजिह्वा ॥

आदेश्च ॥४६॥

विह्वल-शब्दे आदेरपि स्थाने भो वा भवति[1]। भिब्भलो विह्वलः ॥ **विह्वले यौगपद्येन स्यात् भो विह्वयोर्न वा ॥**

आत्मनि पः ॥४७॥

आत्मन्-शब्दे युक्तस्य पादेशो वा भवति[2]। अप्पा अत्ता आत्मा। **अविकल्पेन पादेशो माहात्म्ये प्रतिपाद्यते।** माहप्पं ॥

क्मस्य ॥४८॥

क्म इत्यस्य पकारादेशो भवति। रुप्पं रुक्मम्। रुप्पिणी रुक्मिणी। **बाहुल्यात् कुड्मले ड्मस्य भवत्येव पकारता।** कुप्पलं कुड्मलम् ॥ **त्वस्य स्थाने[3] कचौ क्वापि ग्ध-द्ध-ब्धेषु ढः क्वचित्। त्वस्य कः ॥** मउक्कं मृदुत्वम्। **त्वस्य चः ॥** चच्चरं चत्वरम्। **ग्धस्य ढः ॥** विअड्ढो विदग्धः। **द्धस्य ढः ।** परिअड्ढी परिवृद्धिः। वुड्ढो वृद्धः। **ब्धस्य ढः ॥** थड्ढो स्तब्धः ॥ क्वचिदिति वचनात् सर्वत्र न भवति। गत्तरो गत्वरः। संदिद्धो सन्दिग्धः। णिसिद्धो निषिद्धः। लद्धो लब्धः ॥

शेषादेशयोर्द्वित्वमनादौ ॥४९॥

युक्तस्य लुगवशिष्टः शेषः। तस्य युक्तस्य यथादेशस्तस्य चानादौ वर्तमानस्य द्वित्वं भवति[4]। युक्तस्य शेषो यथा—आसत्तो आसक्तः।

---

1 B स्यात्। 2 B वा स्यात्।

3 After this A has स्याताम्। 4 B स्यात्।

तक्करो तस्करः। भग्गं भग्नम्। भोज्जं भोज्यम्। उक्का उल्का। विप्पओ विप्लवः। णिव्वणो निर्व्रणः। आदेशस्य। मज्जाआ मर्यादा। पज्जाणं पर्याणम्। गड्डो गर्तः। पच्चओ प्रत्ययः। आओज्जं आतोद्यम्। अनादाविति[1] किम्? थविरो स्थविरः। चवणो च्यवनः। धओ ध्वजः। थवओ स्तवकः। फंदो स्पन्दः। झाणं ध्यानम्। खीणो क्षीणः[2]। युक्तस्येत्येव। असई असती। कामुओ कामुकः। तडो तटः। तलाओ तडागः। विसेसो विशेषः। **अनुस्वारादीर्घोदूत्परस्य द्वित्वं नेष्यते**। संखा संख्या। वंको वक्रः। **आतः**। वाससअं वर्षशतम्। पासिण्णं प्रस्विन्नम्। **ईतः**। णीसंदो निष्यन्दः। ईसरो ईश्वरः। **ऊतः**। ऊसित्तो ऊसवो उत्सिक्तोत्-सवयोः॥

युजो द्वितीय-चतुर्थयोः प्रथम-तृतीयौ ॥५०॥

युजो युक्तस्यानादौ स्थितयोः शेषादेशयो र्द्वित्वे कर्तव्ये द्वितीय-चतुर्थयोः परयो र्यथाक्रमं प्रथम-तृतीयावागमौ भवतः। दुक्खं दुःखम्। सोक्खं[3] सौख्यम्। विग्घो विघ्नः। वग्घो व्याघ्रः। मुच्छिओ मूर्च्छितः। ओज्झरो निर्झरः। गोट्ठी गोष्ठी। गुणड्ढो गुणाढ्यः। पत्थिओ पार्थिवः। अद्धओ अध्वगः। गुप्फो गुल्फः। अब्भासो अभ्यासः।[4] णक्खत्तं नक्षत्रम्। लच्छी लक्ष्मीः। उवज्झाओ उपाध्यायः। धिट्ठो धृष्टः। वुड्ढो वृद्धः। वीसत्थो विश्वस्तः। पुप्फिअं पुष्पितम्। भिब्भलो विह्वलः॥

नीडादिषु ॥५१॥

नीडादिषु शब्देष्वनादौ स्थितस्य वर्णस्य द्वित्वं भवति। णेड्डं नीडम्। जोव्वणं यौवनम्। तुण्हिक्को तूष्णिकः। पेम्मं प्रेम[5]। [एक्को एकः।

---

1 B अनादेरिति। 2 B omits this.

3 Not found in B. 4 After this AB आदेशस्य वः.

5 After this AB have omitted two examples. But these are supplied by me, because in the following couplet these words are found.

वाहित्तो व्याहृतः। उज्जुओ ऋजुकः]। सोत्तो स्रोतः। चल्लिओ चलितः। मंडुओ मंडुकः॥

नीड-यौवन-तूष्णीकाः प्रेमैक-व्याहृतर्जवः।

स्रोतश्चलित-मण्डूका नीडाद्या एवमादयः॥

आम्र-ताम्रयो र्वः ॥५२॥

आम्र-ताम्र इत्येतयोः शेषस्य द्वित्वं वकारादेशो भवति। अंबं। तंबं॥

न रहोः ॥५३॥

रेफ-हकारयो र्युक्तवर्णस्य सम्बन्धिनोः शेषादेशयो द्वित्वं न भवति। सुन्देरं सौन्दर्यम्। अच्छेरं आश्चर्यम्। पेरन्तो पर्यन्तः। विहलो विह्वलः। काहावणो कार्षापणः॥

आङो ज्ञादेशस्य[1] ॥५४॥

आङ उत्तरस्य ज्ञ इत्यस्य[2] य आदेशस्तस्य द्वित्वं न भवति। आणा आज्ञा। आणत्ती आज्ञप्तिः। आङ इति किम्? विण्णाणं विज्ञानम्। अविण्णाणं अविज्ञानम्। अहिण्णाणं अभिज्ञानम्॥

समासे वा ॥५५॥

शेषादेशयोरित्यनुवर्तते। समासे स्थितयोः शेषादेशयोर्द्वित्वं वा भवति[3]। शेषस्य। मरुत्थली मरुथली मरुस्थली। गुणज्जेट्ठो गुणजेठ्ठो गुण-ज्येष्ठः। घरद्दारं घरदारं गृहद्वारम्। अणुग्गहो अणुग्गहो अनुग्रहः। घणत्थणी घणथनी घनस्तनी(घनौ स्तनौ यस्याः सा)। विरहक्खमा विरहखमा विरहक्षमा। अंगप्फंसो अंगफंसो अङ्गस्पर्शः। क्वचिदन्यत्रापि। सप्पिआसो सपिआसो सपिपासः (सह पिपासया वर्तते[4])। बद्धप्फलो बद्धफलो बद्धफलः (बद्धं फलं येन यस्य वा सः)। सिहरक्खंडो सिहरखंडो शिखरखण्डः। इत्यादि॥

---

1 B ०देशस्य। 2 B इत्यादेर्य
3 B स्यात्। 4 B omits this.

सेवादिषु च[1] ॥५६॥

सेवादिषु शब्देषु शेषादेशयोरशेषादेशयोश्चानादौ द्वित्वं वा भवति[2]। सेव्वा सेवा सेवैव। कोउह्हलं कोऊहलं कौतूहलम्। दइव्वं दइवं दैवम्। णिहित्तं णिहिअं निहितम्। णक्खो णहो नखः। जण्णुअं जाणुअं जानुकः। संख इव्व संखमिव संखविव्व शङ्ख इव। पक्खे संखो इव संखो विव संखोव। वच्छ व्व वृक्ष इव। अच्छ व्व अक्ष इव। तइल्लोकं तइलोकं त्रैलोक्यम्। कण्णिआरो कणिआरो कर्णिकारः। वण्णो वणो वर्णः। वेस्सा वेसा वेश्या। भुज्जं भुजं भुर्ज्यम्। दुक्खिओ दुहिओ दुःखितः।

सेवा कौतूहलं दैवं निहितं नख-जानुनी।
इत्यादयश्च सेवाद्याः स्युस्तथैवान्ये उदाहृताः।
कर्णिकारश्च त्रैलोक्यं वर्णो भूर्ज्यं तथैव च।
वेश्या च दुःखितश्चैव सेवाद्याः संप्रकीर्तिताः[3] ॥

क्लिष्ट-श्लिष्ट-रत्न-क्रिया-शार्ङ्गेषु[4] विकर्षस्तत् स्वरवत् स्वरश्च पूर्वस्य ॥५७॥

विकर्ष इत्यधिकारः। क्लिष्टादिषु पञ्चसु शब्देषु युक्तस्य विकर्षो भवति। विकर्षे कृते[5] पूर्वस्य युक्तावयवस्य तत् स्वरवत् स्वरो भवति। विकृतस्य[6] युक्तस्य यः स्वरः तद्वद्भ[6]वतीत्यर्थः। किलिट्ठं क्लिष्टं। शिलिट्ठं श्लिष्टम्। रअणं रत्नम्। किरिआ क्रिया। शारंगो शार्ङ्गः॥

कृष्णे वा ॥५८॥

कृष्णशब्दे युक्तस्य वर्णस्य विकर्षो भवति। पूर्वस्य तत् स्वरवत् स्वरः। कसणो कण्हो कृष्णः। व्यवस्थित-विभाषया हरौ नित्यम्, वर्णे तु वा॥

---

1 B omits च।   2 B स्यात्।

3 B परिकीर्तिताः। 4 B सार्ङ्गेषु। 5 Not found in B.

6 A has only तस्य, probably for विकृतस्य as found in B.

6 B has तत्स्वरो etc.

इत्[1] श्री-ह्री-क्रान्त-क्लेश-म्लान-स्वप्न-स्पर्शादर्शहर्षेषु ॥५९॥

श्र्यादीनां युक्तस्य विकर्षो भवति। पूर्वस्य इकारो भवति[2]। सिरी श्रीः। हिरी ह्रीः। किलंतो क्रान्तो। किलेसो क्लेशः। मिलाणो म्लानः। सिविणो स्वप्नः। फरिसो फंसो स्पर्शः। शस्य। दरिसणं दंसणं दर्शनम्। आआरिसो आदर्शः। षस्य। हरिसो हर्षः। उक्करिसो उत्कर्षः। अमरिसो अमर्षः। वरिसो वर्षः। पवरिसो प्रवर्षः। वरिसवरो वर्षवरः। क्वचिन्न स्यात्। वासरत्तं वाससअं वर्षरात्र-वर्षशतयोः। हस्य क्वचिन्न स्यात्। दासारो दाशार्हः॥ **प्लोषे पुष्टे भवेत् स्नायौ श्लोके विश्लेष इत्तथा॥** पिलोसो प्लोषः। पिलुट्ठो प्लुष्टः। सिणाऊ स्नायुः। सिलोओ श्लोकः। **वा विश्लेषो भवेद् वज्रे पूर्वस्येत्वं च पूर्ववत्॥** वइरं वज्जं वज्रम्। **पूर्वशब्दे विप्रकर्षो वा पूर्वस्येत्वं च वस्य मः॥** पुरिमं पुव्वं पूर्वम्॥[3]

अः क्ष्मा-श्लाघयोः ॥६०॥

क्ष्मा-श्लाघयोः शब्दयो र्युक्तस्य विकर्षो वा भवति। छमा[4] खमा क्ष्मा। सलाहा श्लाघा। **वा विकर्षे विपर्यासो दीर्घेऽप्यत्वं च पूर्ववत्।** दीहरो दीहो दीर्घः॥

स्नेहे वा[4] ॥६१॥

स्नेहशब्दे युक्तस्य विकर्षो वा भवति। पूर्वस्याकारः। सणेहो णेहो ण्हेहो स्नेहः॥

---

1 A इः।　　　　　　2 Not found in B.

3 In B the examples of the above three sūtras (57-59) have sometimes been omitted at random.

4 These examples and the following sūtra along with its vṛtti have been omitted in B.

उः पद्म-तन्वी-समेषु ॥६२॥

युक्तस्य विकर्षो भवति[1]। पूर्वस्योकारः। पद्मसमेषु तावत्। पउमं पद्मम्। घसुमरो घस्मरः। कसुमीरो कश्मीरः। वेसुमं वेश्म। सउमं सद्म। अउमरो अम्बरः।

पद्म-घस्मर-कश्मीर-वेश्म-सद्माम्बरादयः।
समानाः पद्मशब्दस्य प्राकृतज्ञैः प्रकीर्तिताः॥

तन्वीसमेषु तावत्। तणुई तन्वी। लहुई लध्वी। असिसुई अशिश्वी[अविद्यमानः शिशुः यस्याः सा[2]]। मउई मृद्वी। खडुई खटी। बहुई बह्वी। गुरुई गुर्वी। पिहुई पृथ्वी॥

तन्वी-लघ्वी तथाशिश्वी मृद्वी खट्वी तथैव च।
बह्वी गुर्वी च पृथ्वी च तन्वाद्याः परिकीर्तिताः॥

बाहुल्याद् द्वारे वा द्वयो र्लोपश्च वा॥ वारं दारं दुआरं॥

ज्यायामीत् ॥६३॥

ज्याशब्दस्य विकर्षो भवति। पूर्वस्य च ईकारः। जीआ ज्या॥

॥ इति श्रीविद्याविनोदाचार्यकृतौ प्राकृतपादे तृतीयः परिच्छेदः॥

चतुर्थः परिच्छेदः

अथ सङ्कीर्णश्चतुर्थः परिच्छेद उच्यते।

अचां सन्धिलोपविशेषादयो बहुलम् ॥१॥

अचां स्थाने सन्धिविशेषा लोपविशेषा आदिना ह्रस्वादयो बहुलं भवन्ति। वासेसी वासइसी व्यासर्षिः। राएसी राअइसी राजर्षिः॥ कणेरो कणआऊरो

---

1 Not found in B. 2 Given by me; not found in AB.

कर्णपूरः ॥ चक्काओ चक्कवाओ चक्रवाकः ॥ कुंभारो कुंभआरो कुम्भकारः ॥ अंधारो अंधआरो अन्धकारः ॥ ममावि ममवि ममापि ॥ केणावि केणवि केनापि ॥ वईमूलं वइमूलं [वृतिमूलम्[1]] ॥ वेणूवणं वेणुवणं वेणुवनम् ॥ जउणाअडं जउणाअडं यमुनातटम् ॥ णाइसोत्तो णईसोत्तो नदीस्रोतः ॥ वहूमुहं वहूमुहं वधूमुखम् ॥ सररुहं सरोरुहं । सिरविअणा सिरोविअणा शिरोवेदना । इत्यादयः सन्धिविशेषाः ॥ राउलं राअउलं राजकुलम् ॥ पावडणं पाअवडणं पादपतनम् ॥ पावीढं पाअवीढं पादपीठम् ॥ तंपि तमपि ॥ तंसि त्वमसि ॥ तुम्हे त्थ यूयमत्र ॥ सिअंचलं श्रियचयाञ्चलम् ॥ पडन्तो पटान्तः ॥ हत्थन्तरं हस्तान्तरम् ॥ वाइंदो वारेन्द्रः ॥ गइंदो गजेन्द्रः ॥ उइंदो उपेन्द्रः ॥ मइंदो मृगेन्द्रः ॥ इंदोओ इन्द्रगोपः । दीवुज्जलो दीपोज्ज्वलः ॥ मअरंदुज्जानं मकरन्दोद्यानम् ॥ पमदोज्जानं प्रमदोद्यानम् । महूसवो महोत्सवः ॥ वसंदूसवो वसन्तोत्सवः । तुह त्ति तव इति ॥ मह त्ति मम इति ॥ गओ त्ति गत इति ॥ दइओ त्ति दयित इति ॥ [क्वचिद् यष्टिशब्दस्य वा ल-लोपः[2]] ॥ चम्मट्ठी चम्मलट्ठी चर्मयष्टिः ॥ बाहुल्यात् असिलट्ठी असियष्टिः ॥ क्वचिन्न सन्धिः । मुहअंदो मुखचन्द्रः ॥ परिअरो परिकरः ॥ उवआरो उपकारः ॥ दुराआरो दुराचारः ॥ विआलो विकालः ॥ इत्यादि । परोप्परं परस्परम् ॥ अंतेउरं अन्तःपुरम् ॥ तेरह त्रयोदश ॥ तेवीसा त्रयोविंशतिः ॥ तेत्तीसा त्रयस्त्रिंशत् ॥ पुणोपुणो पुणपुण पुनःपुनः ॥ एवं महाकवि-प्रयोगानुसारेण सन्धौ प्रकारान्तराणि विज्ञेयानि ॥ तथा चोक्तम्—

क्वचित् प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद् विभाषा क्वचिदन्यदेव ।
विधेर्विधानं बहुधा समीक्ष्य चतुर्विधं बाहुलकं वदन्ति ॥

---

1 AB वतिमूलम्. Emended by me.

2 B omits this. A's reading is not clear. But it has been emended by me on the strength of A's examples.

उदुम्बरे दोर्वा लोपः ॥२॥

उदुम्बर[1]शब्दे दोर्दकारस्य वा[2] लोपो भवति। उम्बरं उउम्बरं वा उदुम्बरम् ॥

कालायसे यस्य ॥३॥

कालाय[3]सशब्दे साचो यस्य लुग् वा भवति। कालासं कालाअसं कालायसम् ॥ क्वचिदन्यत्रापि ॥ तेरह त्रयोदश[4] ॥ तेवीसा त्रयोविंशतिः ॥ तेत्तिसा त्रयस्त्रिंशत् ॥ व्यवस्थित[5]-विभाषया अत्र नित्यम् ॥ क्वचिद्वा सहिओ सहिअओ सहृदयः। कि[6]सलं किसलअं[7] [किस[8]लयम्]। ओसो ओसाओ अवश्यायः। कइवं कइवअं कतिपयम्। सुहाइ सुहाअइ सुखायते। धूमाइ धूमाअइ धूमायते ॥

भाजने जस्य ॥४॥

भाजनशब्दे [9]साचः जस्य[10] लुग्वा भवति[11] ॥ भाणं भाअणं भाजनम् ॥

यावदादिषु वस्य ॥५॥

यावदित्येवं सदृशेषु साचो वस्य लुग्वा भवति। जा जाव यावत्। ता ताव तावत्। जीअं[12] जीविअं जीवितम्। देउलं देअउलं देवकुलम्।

---

1 A उदुम्बरे. 2 B omits वा.

3 B कालायशब्दे (omits स. careless writing.)

4 B omits त्रयोदश (but carelessly writes त्रयोविंशतिः).

5 B •स्थितः. 6 A किंसलं. 7 B omits this.

8 Not given by either; supplied by me to maintain parity.

9 Before this A has अकारस्य. 10 A omits this.

11 A. भवति वा. 12 B जीअ.

अइ'तं आअइ'तं आवर्त्तमानम्[1]। पारओ पावारओ[2] प्रावारकः। एमेव[3] एअमेव[3] एवमेव। खंधारो[3] खंदआरो खंदवारो स्कन्दवारः॥ चक्काओ चक्कवाओ चक्रवाकः। यावत् तावत् जीवित देवकुल आवर्त्तमान प्रावारक एवमेव स्कन्धावार[3] चक्रवाक इत्यादि॥

[4]अन्त्यस्य हलः ॥६॥

नाम्नामन्त्यस्य [5]एतेषां परस्य सुप्प्रत्ययसम्बन्धिनश्च हलो लोपो भवति। वम्मो वर्म्म। कम्मो कर्म। जसो यशः। तमो तमः। [एसो[6]] एषः। धणु धनुः। सक्खी अदन्तपक्षे [सक्खिणो[7]] साक्षी॥

स्त्रियामात् ॥७॥

स्त्रियां वर्तमानस्य नाम्नो हलः स्थाने आकारादेशो भवति। एसा संपआ[8] एषा सम्पत्। एसा आपआ एषा आपद्[9]। इअं सरिआ [इयं सरित्]। इयं वाआ इयं वाक्॥

न विद्युति ॥८॥

विद्युच्छब्दे [10]परेऽन्त्यस्य हल आकारादेशो न भवति[11]। विज्जु॥

रो रा ॥९॥

स्त्रियां वर्तमानस्य नाम्नो योऽन्त्यो रेफस्तस्य स्थाने रादेशो भवति॥ गिरा

---

1 B has अ (careless writing). 2 B omits this.

3 From here upto स्कन्धावार B omits all these. A. खंदारो, खअआरो स्कन्दकार.

4 B omits this sūtra. 5 B omits ए.

6 AB एषो॥ Scribal error, corrected as एसो.

7 AB साक्खिणो। same as 6 f.n.

8 A omits this. 9 B omits this.

10 A omits this. 11 B स्यात्.

गीः। धुरा धूः। पुरा पूः। **बहिः शब्दे हलोऽन्त्यस्य[1] रेफादेशो विभाषया॥** बाहिरं बहिः॥

क्षुधो हा[2] ॥१०॥

क्षुध्-शब्दस्यान्त्यस्य हल स्थाने हादेशो भवति॥ छुहा क्षुधा॥

शरदोऽत्[7]।११॥

शरच्छब्दस्यान्त्यस्य हलः स्थानेऽदादेशो भवति॥ सरओ शरत्॥

दिक्-प्रावृषोः[3] सः ॥१२॥

दिश्-प्रावृष इत्येतयोरन्त्यस्य[4] हलः[5] स्थाने सकारादेशो भवति[6]॥ दिसा दिक्। पाउसो प्रावृट्॥ **आयुरप्सरसो सो वा हलोऽन्त्यस्य विधीयते।** दीहाउसो दीहाऊ दीर्घायुः। अच्छरसा अच्छरा अप्सरसः॥

मोऽनुस्वारोऽचि वा लोपश्च ॥१३॥

सूत्रत्रयमिदम्। अन्त्यस्य हलो मकारस्यानुस्वारादेशो[7] भवति॥ एवं किं एवं किम्[8] इत्येतयोः। कहं कथम्। तुण्हिं तूष्णीम्॥

अचि परेऽन्तस्य हलो मकारस्यानुस्वारादेशो वा भवति। पढं अवहरइ पढमवहरइ पटमपहरति। वसं उवणेइ वसमुवणेइ वशमुपनयति। किं इणमो किमिणमो किमिदम्॥

न लोपोऽलोपः। यस्मिन् पक्षेऽनुस्वारादेशो[9] न भवति तस्मिन् पक्षेऽन्त्यस्य मकारस्य लोपो न भवति। अन्त्यस्य हल इति यस्य लोपः प्राप्तः स

---

1 B अलः स्थाने रेफादेशः स्यात्.

2 Not found in B.

3 B—प्रावृषोश्च.

4 Not found in B.

5 B स्यात्.

6 B omits आदेशः।

7 Not found in B.

8 B omits from आदेशो न to अन्त्यस्य।

9 B omits अचि.

न भवतीत्यर्थः। दर्शितान्युदाहरणानि। अनुस्वारस्य मादेशो वा स्यादचि परे स्थिते। फलमेरिसं फलं एरिसं फलमीदृशम्। अहमेसो अहं एसो अहमेषः। सच्चमिणं सच्चं इणं सत्यमिदम्॥

नञोर्हलि ॥१४॥

हलि परे नकार-ञकारयोः स्थानेऽनुस्वारादेशो भवति। संधा सन्ध्या। बंधा बन्ध्या। पंती पङ्क्तिः॥

वक्रादिषु ॥१५॥

[वक्रादिषु शब्दे[1]ष्व]नुस्वारागमो भवति। वंको वक्रः। तंसं त्र्यस्रम्। वअंसा वयस्या। अंसु अश्रु। सोरंभं सौरभम्। माणंसिणी मनस्विनी। फंसो स्पर्शः। णिअंसणं निवसनम्। सुंकं शुक्लम्॥

वक्र-त्र्यस्र-वयस्याश्रु-सौरभाणि मनस्विनी।
स्पर्शो निवसनं शुक्लं वक्राद्या अपरेऽपि च॥

मांसादिषु वा ॥१६॥

मांसादिषु शब्देष्वनुस्वारस्य लोपो वा भवति[2]। मसं मांसम्। कह कहं कथम्। णूण णूणं नूनम्। दाणि दाणिं इदानीम्। समुहो संमुहो सम्मुखः। सक्कारो संस्कारः। सक्कअं संस्कृतम्॥

मांसादिषु कथं नूनमिदानीं सम्मुखस्तथा।
संस्कार-संस्कृतादौ तु[3] नित्यं बिन्दुर्विलुप्यते॥ इति वररुचिः।

वर्गे परे[4] तद्वर्गान्तः ॥१७॥

वर्गे परेऽनुस्वारस्य तद्वर्गान्तो वा भवति[5]। संकरो सङ्करो। संगमो सङ्गमो शङ्कर-सङ्गमयोः। धणंजयो धणञ्जयो धनञ्जयः। संचिओ सञ्चिओ

---

1 Not found in AB. Emended by me.

2 B स्यात्।

3 A omits तु नित्यम्।

4 A omits परे।

5 B स्यात्।

सञ्चितः। चिरंतणं चिरन्तणं चिरन्तनम्। किंपि किम्पि किमपि। वर्गे इति किम्? अहं राआ अहं राजा॥

नसन्त-प्रावृट्-शरदः पुंसि ॥१८॥

नकारान्त-सकारान्त-प्रावृट्-शरच्च पुंसि वर्तन्ते। वम्मो वर्म। कम्मो कर्म। **नान्तं नपुंसके[1] विद्धि पुंलिङ्गेऽपि प्रचक्षते** इति शाकटायनः। वम्मं वर्म। चम्मं चर्म। पेम्मं प्रेम इत्यादि। सान्तः। तमो तमः। महो महः॥ पाउसो प्रावृट्। सरओ शरत्॥

न शिरोनभसी ॥१९॥

शिरस् नभस्-इत्येतौ पुंसि न वर्तेते[2]। सिरं शिरः। णहं नभः॥

पृष्ठाक्षि-प्रश्नाः स्त्रियां वा[3] ॥२०॥

एते शब्दा स्त्रियां वर्तमाना[4] वा भवन्ति। पट्ठी पट्ठं पृष्ठम्। अच्छी अच्छं अक्षि। पण्हा पण्हो प्रश्नः। एवं **लिङ्ग-विपर्ययो ज्ञेयो शब्दान्तरेष्वपि[5]**। गुणाइं गुणाः। बिंदुइं बिन्दवः। पुंसि तु गुणाः बिन्दुवः। रस्सीइं रस्सआ पक्षे रस्सओ॥

ओदवापयोः[6] ॥२१॥

अव अप इत्येतयोरुपसर्गयोरेकादेशो वा भवति[7]। ओवासो अवकाशः पक्षे अवआसो। ओवाहिअं अवगाढं। पक्षे अववाहिअं। ओसरिअं अवसिरिअं अवसृतम्। ओअत्तं अवअत्तं अपवृत्तम्। **ओत्वं वा स्याच्छिरोमाल्ये क्वचिदोत्वमुपस्य वा।** ओमल्लं निर्माल्यम्। ओहसिअं उवहसिअं उपहसितम्। **लुग्वा दुरुपसर्गस्य क्वचिद् भवेत्।** दूलहो दुल्लहो दुर्लभः। दूसहो दुस्सहो दुःसहः॥

---

1 B नपुंसकम्।
2 B has न वर्तेते पुंसि
3 B omits वा।
4 B has वाच्युः।
5 B शब्दादिष्वपि।
6 B ओरवाद्यो।
7 B स्यात्।

त-त्वयो र्दात्तणौ ॥२२॥

[त-त्वयोः[1]] प्रत्ययोः स्थाणे दा-त्तण-इत्येतावादेशौ भवतः। रंमदा रंमत्तणं रम्यता रम्यत्वम्। तणुदा तणुत्तणं तनुता तनुत्वम्। खामदा खामत्तणं क्षामता क्षामत्वम्। **वकारस्य च लोपोऽपि यथाप्राप्तः प्रवर्तते।**

क्त्वा तूण ॥२३॥

क्त्वा-प्रत्ययस्य स्थाणे तूणादेशो भवति। हंतूण हत्वा। आणंतूण आनीय। काऊण[2] कृत्वा। घेत्तूण गृहीत्वा। **क्वापि क्त्वाप्रत्ययादेश उआण इत्यपीष्यते।** घेऊआण गृहीत्वा। परिहरिअ परिहृत्य। ओसरिअ अपसृत्य। **प्रायः शब्दः कगचादीनां लोपातिव्याप्ति-बाधक** इति शाकटायन-वचनादेषूदाहरणेषु कगचजेत्यादिना लोपः प्रायिकः॥

तृङेरिर ॥२४॥

तृङि प्रत्ययस्य स्थाणे इरादेशो भवति। घोलिरं घूर्णनशीलम्। जंपिरो जल्पनशीलः। वेपिरं वेपनशीलम्॥

आल्विल्लोल्लाल-वन्तेन्ता मत्वादेः ॥२५॥

मत्वादीनां प्रत्ययाणाम् आलु इल्ल उल्ल आल वंत इंत इत्येते आदेशा यथादर्शनं भवन्ति। ईसालू ईर्ष्यावान्। णेहालू णेहाल्लो स्नेहवान्। गहिल्लो ग्रहवान्। सणेहिल्लो स्नेहवान्।

विआरुल्लं विकारवत्। वणालं वनवत्। चोरालं चोरवत्। जसवंतो यशस्वी। धणवंतो धनवान् धनी वा। घरइंतो गृहवान् गृही वा। पुत्तइंता पुत्रवती। **अर्थे[3] तस्येदमित्यस्मिन् तुल्ल-इल्लस्तु तद्भवे।**

---

1 A has तत्व प्रत्ययपोः etc. 2 A reads कातूण.

3 A has अस्ये(?).

आत्मने इदं अप्पुल्लं। ग्रामे भवं गामेल्लं। पुरिल्लं पौरस्त्यम्। **भवेतां मतुपोऽन्त्यस्याकारस्तु तथा क्वचिदिति** वामनः। हणुमंतो हणुमा हनुमान्। **संख्यायाः कृत्वसो हुत्तं आभिमुख्येऽपि दृश्यते।** पंचहुत्तं पञ्चकृत्वः। अट्ठहुत्तं अष्टकृत्वः। सअहुत्तं शतकृत्वः। पियहुत्तं प्रियाभिमुखम्। **इत्तो किं यत्तदेतेभ्यः परिमाणे तिअ-इहौ।** किं परिमाणमस्य केत्तिअं[1] केद्दहं। एवं जेत्तिअं जेद्दहं यावत्। तेत्तिअं तेद्दहं तावत्। एत्तिअं एद्दहं एतावत्॥

स्वार्थे को वा ॥२६॥

नाम्न उत्तरे को वा भवति। भमरओ भ्रमर एव भ्रमरकः। पक्षे भमरो। कसणओ कृष्ण एव कृष्णकः। पक्षे कसणो। चंदओ चन्द्र एव चन्द्रकः। पक्षे चंदो। गअणांगणअं गगनाङ्गणकमित्यादि। **स्वार्थे कः स्यात् इकारो[2] वा को वा तस्मादपि स्मृतः।** पुत्तो पुत्तहो पुत्तहओ पुत्रकः। वच्छो वच्छहओ वत्सकः। हत्था हत्थहा हत्थहआ हस्तकौ। एकओ एकाकी एकको वा।

अज्ञाते कुत्सिते चार्थे तथा ह्रस्वानुकम्पयोः।
संज्ञायामपि विद्वद्भिः प्रत्ययः सम्प्रदर्शितः॥

विद्युत्-पीतयो र्लः ॥२७॥

विद्युत् पीत इत्येतयोः स्वार्थे लो भवति। विज्जुला विद्युत्। पक्षे विज्जुहा। पीअलं पीअं पीतम्॥

वृन्दे दो रः ॥२८॥

वृन्दशब्दे दकारादुत्तरे र-प्रत्ययो भवति। स्वार्थे। अकार-दकारयोर्मध्ये इत्यर्थः। विंद्रं वंद्रं॥

करेण्वां रणोः स्थितिपरिवृत्तिः ॥२९॥

करेणुशब्दे रेफ-णकारयोः स्थितिपरिवृत्तिर्भवति। एसा कणेरू हस्तिनी। स्त्रीलिङ्गनिर्देशात् एस कणेरू हस्ती॥

---

1 A कित्तिअं किद्दहं. 2 A. कुकार etc.

आलाने लनोः ॥३०॥

आलान-शब्दे लकार-नकारयोः स्थितिपरिवृत्ति र्भवति। आणालो। स्थितेः स्याद् परिवृत्तिर्वा हरिताले ल-रेफयोः। हरिआरो हरिआलो।

महाराष्ट्रे हयोः ॥३१॥

महाराष्ट्र-शब्दे हकार-रेफयोः स्थितिपरिवृत्ति र्भवति। मरहट्ठो।

बृहस्पतौ बहोर्भओ[1] ॥३२॥

बृहस्पतिशब्दे बकार-हकारयोः स्थाने भकार-अकारौ भवतः। भअप्पई भअस्सई'त्यपीच्छन्ति कुत्रचित् पस्य लोपतः॥

मलिने लिनोरिलौ वा ॥३३॥

मलिनशब्दे लकार-नकारयोः स्थाने इकार-लकारौ भवतः। मइलं मलिणं मलिनम्॥

गृहस्य घरोऽपतौ ॥३४॥

गृहशब्दस्य घरादेशो भवति। नचेत् पतिशब्दः परो भवति। घरं गृहम्। राअहरं राजगृहम्। घरसामी गृहस्वामी॥ अपताविति किम्? गहवई [गृहपतिः[2]]॥

दंष्ट्रादीनां दाढादयो बहुलम् ॥३५॥

दंष्ट्रादीनां शब्दानां स्थाने दाढादयो बहुलं निपात्यन्ते। कश्चिन्नित्यं यथा— दंष्ट्राललाटपत्तीनां स्युर्भ्रुवो व्याकुलस्य च।
दाढा-णिडाल-पाइक्क-भुमआ-वाउला: क्रमात्॥

कश्चिद्वा— अधो[3] वैदूर्य-शुक्तीनां वध्-भ्रमित-शब्दयोः।
हेट्ठं वेरुलिअं सिप्पी अउज्झा चाथ भामिअम्॥१॥
दुहिता-कृष्णयोस्तद्वत् स्यात् श्वश्रू-लेलिहानयोः।
धूआ आअट्ठिअं चैव अत्ता-लल्लकमेव च॥२॥

---

1 A has च 2 Not found in AB. Emended by me.

3 A has अयो.

मण्डलीसमयेदानीं-निलयानां अवन्त्यमी ।
विचिक्किअं अवच्छम्नं एण्हिं चाथ णिहेलणं ॥३॥
कलसी अवहोवासं श्मशानोभयपार्श्वयोः ।
उत्पलस्य तु कंदोट्टं कोड्डं कौतूहलस्य तु ॥४॥
लज्जालुइणी चेति लज्जावत्यां निपात्यते ।
शालिवाहनशब्दस्य हालो सालाहणो तथा ॥५॥
गोदावर्यास्तु गोला स्यादित्याद्याः पाक्षिकाः पुनः ।
अहो वेदुज्जअं सुत्ती बह्वाद्या एवमादयः ॥६॥
मातृष्वसृ-पितृष्वस्रोरत इत्वं सलुक् ततः ।
पक्षे शब्दस्य सर्वस्य छा इत्येतन्निपात्यते ॥७॥

माउस्सिआ[3] पिउस्सिआ[3] मातृष्वसृ-पितृष्वस्रोरप्यात्वं स्यात् प्रयोगा अपि ज्ञेयाः ।

यथा— भस्म-भीष्म-व्रज-व्रात्य-प्रेत-प्रोक्त विपश्चितः ।
वाक्य-कृष्णाक्षि-प्रेत्यादि यो न यो ना हताः बुधैः ॥

अत्रादिशब्दः प्रकारे । तेनान्येऽपि ये शब्दाः प्राक् संगृहीताः विदर्भादिदेश-गृहीत-सम्बन्धा महाकवि-परम्परा-प्रयुज्यमाना दृश्यन्ते तेऽपि प्रत्यय-लोपागम-वर्ण-विकारादिरूपतया निरूप्यमाणा दाढादित्वेन सङ्गच्छन्त एव । तथा चोक्तम्—

यत्र पदार्थविशेषसमुत्थं प्रत्ययतः प्रकृतेश्च तदूह्यम् इति ।

केचिदाहुः

प्राकृतं त्रिविधं ज्ञेयमनुकारि विकारि च ।
देशीयमिति शब्दज्ञैः प्रयोगो दृश्यते बहु ॥

अनुकारि संस्कृतसदृशं विकारि लक्षणसिद्धं देशीयं मोरट्ठादिदेशप्रसिद्धम् ॥

॥ इति विद्याविनोदार्यकृतौ प्राकृतपादे चतुर्थः परिच्छेदः ॥

---

3 A has सिया ।

पञ्चमः परिच्छेदः

सुब्विधिः

अतः सोरोः ॥१॥

अकारान्तान्नाम्न उत्तरे प्रथमैकवचनस्य सोः स्थाने ओकारो भवति। इंदो इन्द्रः। चंदो चन्द्रः। भत्तारो भर्ता। कत्तारो कर्ता॥

[1]जस्-शसोर्लोपः ॥२॥

अत उत्तरयोर्जस्शसोर्लुग् भवति। देआ देवा देवाः। असुरा असुराः। माणुसा मानुषाः। पिअरा पितरः। भाअरा भ्रातरः। देए देवे देवान्। असुरे असुरान्। माणुसे मानुषान्। पिअरे पितॄन्। भाअरे भ्रातॄन्। माला मालाः। साला शालाः। अग्गी अग्नयः। वाऊ वायवः। णई नद्यः। वहू वध्वः॥

अमोऽतः ॥३॥

अत उत्तरस्यामोऽकारस्य लुग् भवति। गामं गओ ग्रामं गतः। गामं गेण्ह ग्रामं गृहाण। णामं गेण्हइ नाम गृह्णाति। हेलं हेलाम्। लीलं लीलाम्। अग्गिं अग्निम्। वाउं वायुम्। नइं नदीम्। वहुं वधूम्॥

टामोर्णः ॥४॥

अतः सम्बन्धिनष्टामो स्थाने णो भवति। वम्मेण वर्मणा। जम्मेण जन्मना। कत्तारेण कर्त्रा। वम्माण वर्मणाम्। कत्ताराण कर्तॄणाम्। अण्णाण अन्यासाम्। कण्णाण कन्यानाम्॥

इणश्चामः ॥५॥

इण उत्तरस्यामः स्थाने णो भवति। अग्गीण अग्नीनाम्। रमणीण रमणीनाम्। वाऊण वायूनाम्। वहूण वधूनाम्॥

भिसो हिं ॥६॥

अत उत्तरस्य भिसः स्थाने हिं भवति। रम्मेहिं रम्यैः। कम्मेहिं

1 A has अतो जश् etc.

कर्मभिः। लोलाहिं लोलाभिः। पाणीहिं पाणिभ्यां पाणिभिश्च। जाणूहिं जानुभ्यां[1] जानुभिश्च। रमणीहिं रमणीभिः। तणूहिं तनूभिः॥

ङसेरादोदुहिन्तोहयः ॥७॥

अत्र उत्तरस्य ङसेः स्थाने आत् ओत् उत् हिंतो हि इत्येते पञ्च आदेशा भवन्ति। आत्। गामा[2] अओ ग्रामाद् गतः। एवमोत्। गामाओ। उत्। गामाउ। हिंतो। गामाहिंतो। हि। गामाहि। सप्पा भअं सप्पाओ भअं सप्पाउ भअं सप्पाहिंतो भअं सप्पाहि भअं सर्पाद् भयम्। गंगा गंगाओ गंगाउ गंगाहिंतो गंगाहि गङ्गायाः। गिरीओ गिरीउ गिरिहिंतो गिरिहि गिरेः। साणूओ साणूउ साणूहिंतो साणुहि सानोः। **बाहुल्याद् ह्रस्वेदुद्भ्यां हि वादेशो न भवति।** तरुणीओ तरुणीउ तरुणीहिंतो तरुणीहि तरुण्याः। वहूओ वहूउ वहूहिंतो वहूहि वध्वाः। **अनभिधानान्नान्तादाकारादेशः॥**

भ्यसो हिंतो-सुंतो ॥८॥

अत्र उत्तरस्य भ्यसः स्थाने हिंतो सुंतो इत्येतावादेशौ भवतः। पंचाहिंतो पंचासुंतो पञ्चभ्यः। सत्ताहिंतो सत्तासुंतो सप्तभ्यः। रामाहिंतो रामासुंतो रामेभ्यः। अच्छीहिंतो अच्छीसुंतो अक्षिभ्यः। गुरुहिंतो गुरुसुंतो गुरुभ्यः। रमणीहिंतो रमणीसुंतो रमणीभ्यः। चमूहिंतो चमूसुंतो चमूभ्यः॥

ङसः स्सः ॥९॥

अत्र उत्तरस्य ङसः स्थाने द्वित्वापन्नः सकारो भवति। णरस्स नरस्य। वाणरस्स वानरस्य। तमस्स तमसः। तेजस्स तेजसः। मउलिस्स[3] मौलेः। हणुस्स हनोः॥

ङेरेम्मी ॥१०॥

अत्र उत्तरस्य ङिकारस्य स्थाने ए-म्मि इत्येतावादेशौ भवतः। सरे सरम्मि सरसि। वम्मे वम्मम्मि वर्मणि। गिरे गिरिम्मि गिरौ॥

---

1 A omits this. 2 A has गमा etc. 3 A has मउलस्स.

सुपः सुः ॥११॥

अत उत्तरस्य सुपः स्थाने सुर्भवति। सरेसु सरःसु। कमलेसु कमलेषु ॥

जस्-ङस्यां सु दीर्घः ॥१२॥

जस्-ङसि-आम् इत्येतेषु परेषु अतः स्थाने दीर्घो भवति। जसि। देवा देवाः। माणुसा मानुषाः। **सर्वादि[1]स्विदमो दीर्घो न त्वन्येषां [ङसौ[2]] भवेदिति कात्यायनः।** इमाओ इमाउ इमाहि। इदम इति किम्। सव्वओ सव्वदो सर्वस्मात्। तओ ततो तदो तस्मात् ततो वा। आमि। देवाण देवानाम्। माणुसाण मानुषाणाम्। जसि। गिरी गिरयः। तरू तरवः। बुद्धी बुद्धयः। वेणू वेणवः। गिरीओ गिरेः। तरुओ तरोः ॥

अत एत् स्वादौ ङि-ङस्-वर्जम्। १३।

ङि-ङस्-वर्जे स्वादौ परेऽतः स्थाने एतद्भवति। जणे पेच्छ जनान् पश्य। अरणे पेच्छ अन्यान् पश्य। जणेण जनेन। अरणेण अन्येन। जणेहिं जनैः। अरणेहिं अन्यैः। **बाहुल्यात् ङसि न स्यात्।** पंचाहिंतो पंचासुंतो पञ्चभ्यः। **आत्वं जसिशसोरेत्वं क्वचिन्न स्यात् प्रयोगतः।** छ षट्। पंच पञ्चैव। सत्त सप्त। छ पेच्छ षट् प्रेक्षस्व। पंच पेच्छ पञ्च प्रेक्षस्व। सत्त पेच्छ सप्त प्रेक्षस्व ॥

क्वचिदचि लोपः ॥१४॥

अजादौ स्वादौ परे क्वचिदकारलोपो भवति। जम्मो जन्म। तमो तमः। पाउसो प्रावृट्। सरओ शरत्। चंदओ चन्द्रकः। सप्पा अहिअं पिसुणा बिहेइ सर्पादधिकं पिशुनाद् बिभेति। णहे पच्छिणो नभसि पक्षिणः। दहे मच्छा ह्रदे मत्स्याः। क्वचिदिति किम्। सप्पाओ सप्पाउ पिसुणाओ पिसुणाउ। सर्पात् पिशुनात्। अचीति किम्। णहम्मि नभसि। दहम्मि ह्रदे। अच इति किम्। भव्वाओ भव्याः। बुद्धीओ बुद्धयः। धेणूओ धेनवः। सहीओ सख्यः। बहूओ वध्वः ॥

---

1 A has सर्वास्वि ; drops दि.   2 Not found in A.

इणः शसो णो ॥१५॥

इण उत्तरस्य शसः स्थाने णोकारो भवति। सहिणो सखीन्। सारहिणो सारथीन्। बहूणो बहून्॥

ङसि-ङसोर्वा ॥१६॥

इण उत्तरयो ङसि-ङसोः स्थाने णोकारो भवति वा। ङसि। जलहिणो जलहीओ जलधेः। मेरुणो मेरुओ मेरोः। ङस्। असिणो असेः। रासिणो राशेः। इंदुणो इन्दोः। पक्षे असिस्सेत्यादि॥

जस ओवो वात्वं च ॥१७॥

इण उत्तरस्य जसः स्थाने णो भवति। ओकारैकारो वा स्याताम्। एतयोः सन्नियोगे इणः स्थाने अकारादेशः। रासिणो रासओ रासवो रासा राशयः। वेरिणो वेरओ वेरवो वैरिणः। वेणूणो वेणओ वेणवो वेणवः॥

सु-भिस्-सुप्सु दीर्घः ॥१८॥

सु-भिस्-सुप्सु परेषु इणः स्थाने दीर्घो भवति। पंती पङ्क्तिः। तंतू तन्तुः। पंतीहिं पङ्क्तिभिः। पंतीसु पङ्क्तिषु। क्वचिदनुवृत्त्या भूमिहिं भूमिसु इत्यादि॥

स्त्रियां शस उदोतौ ॥१९॥

स्त्रियां वर्तमानान्नाम्नः शसः स्थाने उत् ओत् इत्येतौ भवतः। आसाउ[1] आसाओ आशाः। दिसाउ दिसाओ दिशः। **बहुलवचनादाकारादणो जस्-शसोर्लोप इत्यपि भवति।** जुवईउ जुवईओ युवतिः। माणिणीउ माणिणीओ मानिनी।

जसो वा ॥२०॥

स्त्रियां वर्तमानान्नाम्नो जसः स्थाने उकारौकारौ भवतो वा। रेहाओ रेहाउ रेहा रेखाः। साहाउ साहाओ शाखाः। सिप्पीउ सिप्पीओ सिप्पी

---

1 A has first आसाओ and then आसाउ।

शुक्तयः। सिप्पाऊउ सिप्पाऊओ सिप्पाउ शायवः। देईउ देईओ देई देव्यः। सासूउ सासूओ सासू श्वश्रूः॥

अमि ह्रस्वः॥२१॥

स्त्रियां अमि परे दीर्घो ह्रस्वो भवति। धरं धराम्। लहुइं लघ्वीम्। गुरुइं गुर्वीम्। कहुं कद्रूम्॥

टा-ङस्-ङीनामिदेदादतः॥२२॥

स्त्रियां वर्तमानान्नाम्न उत्तरेषां त्रयाणां स्थाने इत् एत् अत् आत् इत्येते चत्वार आदेशा भवन्ति। बुद्धीइ बुद्धीए बुद्धीअ बुद्धीआ बुद्धया बुद्धेः बुद्धौ वा। धेणूइ धेणूए धेणूआ धेन्वा धेनोः धेनौ वा। ससिमुहीइ ससिमुहीए ससिमुहीअ ससिमुहीआ शशिमुख्या शशिमुख्याः शशिमुख्यां वा। करहोरूइ करहोरूए करहोरूअ करहोरूआ करभोर्वा करभोर्वाः करभोर्वाम्॥

नातोऽदातौ॥२३॥

स्त्रियामात उत्तरेषां टादीनां स्थाने अत् आत् इत्येतावादेशौ न भवतः। गोलाइ गोलाए गोदावर्या गोदावर्य्यां वा। धुराइ धुराए धुरा धुरः धुरि वा॥

आदीतौ बहुलम्॥२४॥

स्त्रियां वर्तमानान्नाम्न आत् इत् इत्येतौ बहुलं भवतः। काइ कीई कया कस्याः कस्यां वा। जाइ जीई यया यस्याः यस्यां वा। ताइ तीई तया तस्याः तस्यां वा। हलद्दा हलीद्दा हरिद्रा। सुप्पणहा सुप्पणही शूर्पणखा। बहुलग्रहणादाकार एव। असहणा असहना। कोपणा कोपना। पिआ प्रिया। वल्लहा वल्लभा। क्वचिदीकार एव। माणिणी मानिनी। माणंसिणी मणंसिणी मनस्विनी। गाअणी गायनशब्दस्य। णच्चणी नर्त्तनशब्दस्य।

अदन्तात् परमाकार ईकारो व्यञ्जनादपि।
इत्येवं व्यवतिष्ठन्ते बहुलग्रहणात् परे॥

क्लीबे सोरनुस्वारः॥२५॥

क्लीबे सोः स्थानेऽनुस्वारो भवति। णअणं नयनम्। वअणं वयनम्।

रअणं रत्नम्। दहिं दधि। महुं मधु। अच्छिं अक्षि। धणुं धनुः॥

इं जस्-शसोर्दीर्घश्च ॥२६॥

क्लीबे जस्-शसोः स्थाने इं आदेशो भवति। पूर्वो दीर्घश्च। पुरणाइं पुण्यानि। रणाइं अरण्यानि। जाइं यानि। ताइं तानि। दहीइं दधीनि। वारीइं वारीणि। महूइं मधूनि। साहूइं साधूनि। **भवेद्वा जस्-शसोस्तद्वानुकारोऽपि नपुंसके।** अच्छीणि अक्षीणि॥

सम्बुद्धौ न णोरो दीर्घानुस्वाराः ॥२७॥

सम्बोधने यः प्रत्ययस्तस्मिन् सति ओकारादेशो दीर्घत्वमनुस्वारादेशश्च न भवति। हे देअर हे देवर। हे वल्लह हे वल्लभ इत्यादावोत्वाभावः। हे कामि हे कामिन्। हे सामि हे स्वामिन्। अरे वडु[1] अरे वटो। अरे पसु अरे पशो। इत्यादौ दीर्घत्वाभावः। हे मिहुण हे मिथुन। हे हिअअ हे हृदय। हे अच्छि हे अक्षि। हे दहि हे दधि। हे जाणु हे जानु। हे जउ हे जत्रो इत्यादावनुस्वाराभावः। बाहुल्यात् कचिद्दीर्घः। हे पहू हे प्रभो॥

स्त्रियामात एत् ॥२८॥

सम्बोधने स्त्रियामातः सौ परे एद्भवति। हे बाले हे बाले। हे मुद्धे हे मुग्धे। बाहुल्यात् कचिन्न स्यात्। हे माउच्छा हे मातृष्वसः। हे पिउच्छा हे पितृष्वसः। हे अत्ता हे श्वश्रू॥

ईदूतोर्ह्रस्वः ॥२९॥

सम्बुद्धौ सौ परे स्त्रियामीदूतो ह्रस्वो भवति। हे माणिणि हे मानिनि। हे बहु हे वधु। हे सासु हे श्वश्रु॥

ऋत आरः सुपि ॥३०॥

स्वादौ परे ऋकारस्य आरो भवति। भत्तारो भर्ता। भत्तारं भर्तारम्। भत्तारेहिं भर्तृभिः। भत्तारेण [भर्त्रा]। भत्तारओ भर्तुः। भत्तारहिंतो

---

1 A. has वड्ढ.

भर्तृभ्यः। भत्ताराणं भर्तृणाम्। भत्तारम्मि भर्तरि। भत्तारेसु भर्तृषु। सम्बोधने। हे भत्तार हे भर्तः॥

मातुर्वा ॥३१॥

स्वादौ परे मातृशब्दस्य ऋतः स्थाने आकारो भवति। माआ माता। जसि—माआओ मातरः। अमि—माअं मातरम्। शसि—माआओ मातॄः। टायां—माआइ माता। भिसि—माआहिं मातृभिः। ङसौ—माआउ मातुः। ङसि—माआइ मातुः। भ्यसि—माआहिंतो मातृभ्यः। आमि—माआण मातॄणाम्। ङौ—माआइ मातरि। सुपि—माआसु मातृषु। सम्बोधने। हे माए हे मातः॥

मातृ-स्वसृ-ननान्दृश्च ॥३२॥

एषां त्रयाणामपि स्वादौ परे ऋत आद्भवति। माउस्सिआ मातृष्वसा। पिउस्सिआ पितृष्वसा। जसि—माउस्सिआओ मातृष्वसारः। पिउस्सिआओ पितृष्वसारः। णणंदा ननान्दा। जसि—णणंदाओ ननान्दरः॥

उ जस्-शस्-टा-ङस्सु वा ॥३३॥

जस्-शस्-टा-ङस् इत्येतेषु चतुर्षु परेषु ऋतः स्थाने उकारो वा भवति। जसि—भत्तु भत्तारः। शसि—भत्तुणो भर्तॄन्। पक्षे भत्तारो। टायां—भत्तुणा भर्त्रा। पक्षे भत्तारेण। ङसि—भत्तुणो भर्तुः। पक्षे भत्तारस्स॥

पितृ-भ्रातृ-जामातॄणामरः ॥३४॥

एषां त्रयाणां स्वादौ परे ऋतः स्थानेऽरो भवति। जसि—पिअरा भाअरा जामाअरा। अमि—पिअरं भाअरं जामाअरं। शसि—पिअरे भाअरे जामाअरे। टायां—पिअरेण भाअरेण जामाअरेण। भिसि—पिअरेहिं भाअरेहिं जामाअरेहिं। ङसौ—पिअरउ भाअरउ जामाअरउ। भ्यसि—पिअरहिंतो भाअरहिंतो जामाअरहिंतो। ङसि—पिअरस्स भाअरस्स जामाअरस्स। आमि—पिअराणं भाअराणं जामाअराणं। ङौ—पिअरे भाअरे जामाअरे। सुपि—पिअरेसु भाअरेसु जामाअरेसु॥ पूर्वसूत्रेण पक्षे उकारोऽपि। तेन जसि—पिउ भाउ जामाउ। शसि—पिउणो

भाऊणो जामाऊणो । टायां—पिउणा भाउणा जामाउणा । ङसि—पिउस्स भाउस्स जामाउस्स ॥

आ च सौ ॥३५॥

सौ परे पितृ-भ्रातृ-जामातृणामृतः स्थाने आकारो भवति ॥ चकारादरा[1]-देशश्च । पिआ पिअरा पिता ॥ भाआ भाअरो भ्राता ॥ जामाआ जामाआरो जामाता ॥ सम्बोधने हे पिआ हे भाआ हे जामाआ । पक्षे हे पिअर हे भाअर हे जामाअर ॥

अन्यस्यापि ॥३६॥

पित्रादिभ्योऽन्यस्यापि ऋतः स्थाने सौ परे आद्भवति । भत्ता भत्तारो भर्ता । सम्बोधने हे कत्ता हे कर्त्तः ॥ हे पोआ पोआरो पोता । हे पोआ हे पोआरो हे पोतः ॥

राज्ञोऽन्तस्य ॥३७॥

राजन्-शब्दस्यान्तस्य स्थाने सौ परे आकारो भवति । राआ राजा ॥

सम्बोधनेऽनुस्वारो वा ॥३८॥

राज्ञ उत्तरस्य सम्बोधन-विषयस्य सोः स्थानेऽनुस्वारो भवति वा । हे राअं हे राआ हे राजन् । **बाहुल्याद् भवद्-भगवतोर्नित्यमसम्बुद्धौ च ।** भअं भवान् । हे भअं हे भवन् । भअअं भगवान् । हे भअअं हे भगवन् ।

जस्-शस्-ङसां णो ॥३९॥

राज्ञ उत्तरेषां जस्-शस्-ङसां स्थाने णोर्भवति । राआणो राजानः । राआणो पेच्छ राज्ञः प्रेक्षस्व । राइणो धणं राज्ञो धनम् ॥

शस एच ॥४०॥

राज्ञ उत्तरस्य शसः स्थाने णो भवति । एच । राआणो पेच्छ राए पेच्छ राज्ञः प्रेक्षस्व ॥

---

1 A चकारादाकारादेशश्च ।

अमामो र्णं ॥४१॥

राज्ञ उत्तरयोरमामोः स्थाने णं भवति। राआणं राजानं राज्ञां वा ॥

टा णा ॥४२॥

राज्ञष्टाकारस्य स्थाने णा भवति। राइणा राज्ञा ॥

ङसश्च द्वित्वं वा जलोपश्च ॥४३॥

राजशब्दात् परस्य टाप्रत्ययस्य ङसश्च यावादेशौ विहितौ तयोर्द्वित्वं वा भवति। तत्सन्नियोगे जस्य लोपो भवति। रण्णा राज्ञा। रण्णो राज्ञः। पक्षे राइणो। **णोङसोर्वाभवेद् द्वित्वं राज्ञो लोपश्च जस्य वेति वामनः।** राअओ राआउ राआइ ॥

इदन्तस्याद्वित्वे ॥४४॥

टा ङसादेशयोरद्वित्वे सति राज्ञोऽन्तस्य स्थाने इद्भवति। राइणो राज्ञा। राइणो राज्ञः। अद्वित्वे इति किम्। रण्णा रण्णो। **ङसि-ङयोर्जस्-शसो राज्ञः पूर्वादेशेऽनज्ञादिकम् इति शाकटायनः।** ङसौ—राइणो राज्ञः। ङौ—राइम्मि राजनि। जसि—राइणो राआणो राजानः। शसि—राइणो राआणो राज्ञः। अजादिके तु राआओ राआउ राज्ञः। राओ राजनि। राए पेच्छ राज्ञः प्रेक्षस्व। **भिस्-भ्यसोर्सुपोरित्वं राज्ञोऽकारस्येष्यते इति कात्यायनः।** राइहिं राएहिं राजभिः। पक्षे राएहिं राइहिंतो राइसुंतो राजभ्यः। पक्षे राआहिंतो राआसुंतो राइणं राज्ञाम्। पक्षे राआणं। राइसु राजसु। पक्षे राएसु ॥

आ णोणमोरङसः ॥४५॥

ङस्-वर्जितस्य सुपः स्थाने विहितयोर्णोणां इत्येतयोः परयो राज्ञोऽन्तस्याकारो भवति। राआणो राजानः। राअणो णिअच्छ राज्ञः पश्य। राअणं राजानम्। अङस इति किम्। राइणो अराणा राज्ञ आज्ञा ॥

आत्मनोऽप्पाणो वा ॥४६॥

मण्डूकप्लुताधिकारात् सुपि परे आत्मन्-शब्दस्य स्थाने अप्पाणो वा निपात्यते। अप्पाणो आत्मा। अप्पाणो आत्मनः। अदन्तवद्रूपमूह्यम् ॥

इद् द्वित्ववर्जं राजवद्नादेशे ॥४७॥

अनादेशे सति इत्थं द्वित्वं च वर्जयित्वा आत्मन्-शब्दस्य राजवद् भवति। राजनि विहितानि सूत्राणि भवन्तीत्यर्थः। अप्पा आत्मा। हे अप्पं हे आत्मन्। अप्पाणो आत्मानः। शसि—अप्पाणो अप्पे आत्मनः। आमि। अप्पाणं आत्मानम्। इद्द्वित्ववर्जमिति किम्। अप्पणा आत्मना। ङसि—अप्पणो आत्मनः। **भिसामो ङिसुपोर्बिन्दुरिति वररुचिः।** अप्पणेहिं आत्मभिः। अप्पणाणं आत्मनाम्। अप्पणं आत्मनि। अप्पणेसु आत्मसु। **टा इत्यस्य आइ इत्येके।** अप्पणिआ आत्मना॥

एवं ब्रह्मादीनां बम्हणादयः ॥४८॥

ब्रह्मादीनां स्थाने सुपि परे बम्हणादयो निपात्यन्ते। एवं पूर्वोक्तप्रकारेण यथा आत्मन् शब्दस्यानादेशे राजवद्भावस्तथा ब्रह्मादीनामपि राजवद्भावः। बम्हाणो ब्रह्मा। बम्हणा ब्रह्माणः। बम्हाणं ब्रह्माणम्। बम्हणो पेच्छ ब्रह्मणः प्रेक्षस्व। अनादेशे तु बम्हा ब्रह्मा। बम्हाणो ब्रह्माणः। ब्रह्मान बम्हणो बम्हे ब्रह्माणः। ब्रह्मादि—युवन् जुआण मघवन् मघवाण ग्रावन् गावाण उक्षन् उच्छाण पूषन् पूसाण अध्वन् अद्धाण इत्यादि॥

सर्वनाम्नो जस एः ॥४९॥

सर्वनाम्न इत्यधिकारः। सर्वनाम्न उत्तरे जसः स्थाने एकारो भवति। सव्वे के इमे सर्व-किमिदमात्। जे ते यत्तदोः। अण्णे इतरे अन्येतरयोः। एवमन्यत्रापि॥

ङेः स्सिं-म्मि-त्था ॥५०॥

सर्वनाम्नो ङेः स्थाने स्सिं-म्मि-त्थ इत्येते आदेशा भवन्ति। सव्वस्सिं सव्वम्मि सव्वत्थ सर्वस्मिन्। जस्सिं जम्मि जत्थ यस्मिन्। कस्सिं कम्मि कत्थ कस्मिन्। तस्सिं तम्मि तत्थ तस्मिन्। एवमन्यत्रापि॥

इदमेतत्-किं-यत्तद्भ्यः टा इणा वा ॥५१॥

इदं एतत् किं यत्तद् इत्येतेभ्यः सर्वनामभ्य उत्तरस्याष्टायाः स्थाने इणादेशो भवति। इमिणा इमेण अनेन। एदिणा एदेण एतेन। एदिणा

एएण इति। किणा केणा केन। जिणा जेणा येन। तिणा तेण तेन॥

आम एसिं ॥५२॥

इदमादिभ्य उत्तरस्यामः स्थाने एसिं वा भवति। इमेसिं इमाण। एदेसिं एदाण एतेषाम्। एएसिं एआण इति वा। केसिं काण केषां। जेसिं जाण येषाम्। तेसिं ताण तेषाम्॥ सव्वेसिं चाथ सव्वासिं सर्वलिङ्गेषु तत्समावितिवररुचिः॥

किं-यत्तद्भ्यो ङस आस॥५३॥

किंयत्तद् इत्येतेभ्य उत्तरस्य ङसः स्थाने आस आदेशो भवति। कास कस्स कस्य। जास जस्स यस्य। तास तस्स तस्य॥

ङ्यः स्सा से॥५४॥

ङी-प्रत्ययान्तेभ्य उत्तरस्य ङसः स्थाने स्सा से इत्येतौ भवतः। किस्सा कीसा कस्याः। पक्षे कीइ कीए कीअ कीआ। जिस्सा जीसा यस्याः। पक्षे जीइ जीए जीअ जीआ। तिस्सा तीसा तस्याः। पक्षे तीइ तीए तीअ तीआ। कासे जासे तासे पक्षे काइ काए ताइ ताए इति चेत्येके॥

ङेर्हिं॥५५॥

किं-यत्तद्भ्य उत्तरस्य ङेः स्थाने हिं वा भवति। कहिं कस्मिन्। पक्षे कस्सिं कस्सि कत्थ। जहिं यस्मिन्। पक्षे जस्सिं जस्सि जत्थ। तहिं तस्मिन्। पक्षे तस्सिं तस्सि तत्थ। अण्णहिं अन्यस्मिन्। पक्षे अण्णस्सिं अण्णस्सि अण्णत्थ इत्येके॥

आहे इआ काले॥५६॥

किं-यत्तद्भ्य उत्तरस्य ङेः स्थाने आह इआ इत्येतावादेशौ वा भवतः काले प्रतिपाद्ये। काहे कइआ कस्मिन् काले कदा। पक्षे कहिं कस्सिं कम्मि कत्थ। जाहे जइआ यस्मिन् काले यदा। पक्षे जहिं जस्सिं जम्मि जत्थ। ताहे तइआ तस्मिन् काले तदा। पक्षे तहिं तस्सिं तम्मि तत्थ॥ आला इत्यपि यत्तद्भ्यां काले वाच्ये भवन्ति ङेरिति शाकटायनः॥ आला

जइआ जदा। ताला तदा। **इआोर्ङेरेतदस्ताहे एकशब्दादिआ तथेति कात्यायनः।** एत्ताहे एतर्हि। पक्षे एतस्सिं एतम्मि एतत्थ। एक्कइआ एकदा। पक्षे पूर्ववत्। पक्षे च ङेरित्यादेशः। **काले स्यात् सर्व शब्द इति वररुचिः।** सव्वइआ सर्वदा। पक्षे सव्वस्सिं सव्वस्सि सव्वत्थ ॥

ओत्तोदो ङसेरनिदमः ॥५७॥

इदमवर्जितात् सर्वनाम्न उत्तरस्य ङसेः स्थाने ओ त्तो दो इत्येते आदेशा भवन्ति। सव्वओ सव्वत्तो सव्वदो सर्वस्मात्। अण्णओ अण्णदो अन्यस्मात्। जओ जत्तो जदो यस्मात्। इत्यादयः। अनिदम इति किम्। इमा इमाओ इमाउ इमाहि अस्मात्। इमाहिन्तोऽपि दृश्यते। **तो इत्यपि तदः प्राहुरादेशं ङसिना सहेति भागवृत्तिः।** तो तस्मात् ॥

तदो ङसा से वा स्त्रियामपि ॥५८।

स्त्रियां स्त्रीलिङ्गेऽपि शब्दात् पुंनपुंसकयोरपि तद्-शब्दस्य स्थाने ङसः से इत्ययमादेशो भवति वा। से तस्य। पक्षे तस्स। से तस्याः। पक्षे तीइ तीए तीअ तीआ। एतदर्थेत्येके। से एतस्य। पक्षे एतस्स। से एतस्याः। पक्षे एआइ एआए।

आमः सिं ॥५९॥

स्त्रीलिङ्गेऽपि तद्-शब्दस्य आमा सह सिं इत्यादेशो भवति। सिं तेषाम्। पक्षे ताण। सिं तासाम्। पक्षे ताणा। **अं-टा-भिस्सु तदः स्थानेऽ-स्त्रियामपि इष्यते।** णं पेच्छ तं प्रेक्षस्व। णेण कअं तेन कृतम्। स्त्रियामपि णं पेच्छ तां प्रेक्षस्व। णाइ कअं तया कृतम्। णाहि कअं ताभिः कृतम्॥ **स्त्रियामपि सहैवामा स्यात् सिं इदमो वेति जिनेन्द्रः।** सिं एषाम्। पक्षे इमाण ॥

किमः कः ॥६०॥

सुपि परे किमः स्थाने को भवति। को कः के संस्कृतमप्येवं कं कमेव। कीइ कीए कया कस्याः कस्यां वा। कानि काइं। **नपुंसके स्वमोः कत्वं न**

किमः स्याच्च लुप्तयोरिति भाष्यम्॥ किएअं किमेतत्। किं किरेइ किं करोमि॥

इदम इमः ॥६१॥

सुपि परे इदम· स्थाने इमादेशो भवति। इमो अयम्। इमस्स अस्य। इमेसु एषु॥ स्त्रियाम् इमा इयम्। इमाओ इमाए अस्याम्। एआए अनया अस्याम्। नपुंसके इमाइं इमानि। **आदेशाविदमश्चान्यौ सौ पुंसि अमिअं स्त्रियामिति** कात्यायनः[1]। अअं भत्तारो अयं भर्त्ता। इयं भरिआ इयं भार्या। **इमिआ चादेशः सौ स्त्रियामिदमो भवेत्**। इमिणो इयम्॥

अः **स्सिं-स्सयोर्वा** ॥६२॥

स्सि स्स इत्येतयोः परयोरिदमः स्थाने अकारादेशो भवति। अस्सिं अस्मिन् इमस्सिं अस्मिन्। अस्स इमस्स अस्य। **स्यात् प्रत्ययान्तरेऽप्येत्थं स्त्रियामन्यत्र वेदम इति काशिकावृत्तिः**। एहि एभिः। पक्षे इमेहि एषु पक्षे इमेसु। स्त्रियां तु आहि इमाहि आसु इमासु आसु। **इदमोऽत्वं स्त्रियामात्वं सह स्सा च ङसस्तुवा**। अस्सा अस्या इत्येके। पक्षे इमाइ इमाए॥

ङेर्मेन हः ॥६३॥

इदमो ङिकारस्य स्थाने मकारेण सह हकारो वा भवति। इह अस्सिं अस्सि अस्मिन्॥

नपुंसके स्वमोविदमिणमिणमो ॥६४॥

नपुंसकलिङ्गे वर्तमानस्य इदमः स्थाने स्वमोः परयोः इदं-इणं-इणमो इत्येते त्रय आदेशा भवन्ति। इदं इणं इणमो। सौ अमि च। इमं चेत्येके॥

---

1 A has कात्यः.

एतदः सोरोत्वं वा ॥६५॥

[1]एतच्छब्दादुत्तरस्य सोः स्थाने ओकारो वा भवति। एसो[2] एषः ॥

त्तो ङसेः ॥६६॥

एतदुत्तरस्य ङसेः स्थाने त्तो भवति। एत्तो एतस्मात्। नियममत्वादस्य पक्षे एआआ एआओ एआउ एआहि ॥

तोलुक् त्तोत्थयोः ॥६७॥

त्तोत्थयोः परयोरेतदोऽन्तो लुग् भवति। एत्तो एतस्मात्। एत्थ एतस्मिन् ॥

तदेतदोः सः सावनपुंसके ॥६८॥

अनपुंसके लिङ्गे वर्तमानयोस्तदेतदोस्तकारस्य सौ परे सकार-साकारौ भवतः। सो पुरिसो स पुरुषः। सा जुअई सा युवतिः। एसा जुअई एषा युवतिः। अनपुंसक इति किम्? तं धनं तद्धनम्। एअं वणं एतद्वनम्। **एस इत्येव सावाहुः स्त्रियामित्येतदः परे।** एस गई एषा गतिः। एस मई एषा मतिः। अस्त्रियां तु एदं वणं एदं माणं ॥

अदसो दो मुः ॥६९॥

स्त्रियामपि लिङ्गत्रये अदसो दो मुर्भवति। अमु पुरिसो अमी पुरुषाः। अमुणो पेच्छ अमून् प्रेक्षस्व। अमुणा अमुना। अमुणो धणं अमुष्य धनम्। अमू जुअई अमूर्युवतयः। अमुउ पेच्छ अमूः प्रेक्षस्व। अमूइ धणाइ अमूनि धनानि ॥

हो वा सौ ॥७०॥

त्रिषु लिङ्गेषु सौ परेऽदसो दकारस्य हकारो भवति वा। अह पुरिसो असौ पुरुषः। पक्षे अमू पुरिसो। अह जुअई असौ युवतिः। पक्षे अमू जुअई। अह वणं अहो वणं पक्षे अमुं वणं। **हकारादेशो लिङ्गविशिष्टत्वानभिधानान्न भवति।** अह पुरिसो असौ पुरुषः ॥

---

1 A reads एतद्शब्दात etc. 2 After this A has एसः।

पदस्य[1] ॥७१॥

अधिकारोऽयम् ॥

युष्मदस्तं तुमं[1] ॥७२॥

युष्मदः पदस्य तं तुमं इत्येतौ भवतः । तं [तुमं[2]] दिट्ठो त्वं दृष्टः ॥

तुं चामि ॥७३॥

अमि सति युष्मदः पदस्य त्वामित्यस्य स्थाने तुं आदेशो भवति । च-शब्दात् तं तुमं इत्येतावपि । तुं पेच्छामि । तुमं पेच्छामि । त्वां प्रेक्षे । तुमे वेत्येके । तुमे पेच्छामि ॥

तुज्झे-तुब्भे-तुम्हे जसि ॥७४॥

जसि सति युष्मदः पदस्य यूयमित्यस्य स्थाने तुज्झे तुब्भे तुम्हे इत्येते भवन्ति । तुज्झे गुरू । तुब्भे गुरू । तुम्हे गुरू । यूयं मे गुरवः । तुब्भे तुम्हे तुज्झे इत्येके ।

वो च शसि ॥७५॥

शसि सिद्धस्य युष्मदः पदस्य युष्मान् इत्यस्य स्थाने वो भवति । चकारात् पूर्वोक्तास्त्रयः । वो रक्खउ तुज्झे रक्खउ इत्यादि युष्मान् रक्षतु ॥

टाङ्योस्तइ-तए-तुमइ-तुमए-तुमे ॥७६॥

टाङ्योः सिद्धयोर्युष्मदस्मदोः पदयोः त्वया त्वयि इत्येतयोः स्थाने पञ्चादेशाः प्रत्येकं भवन्ति । तइ कअं तए कअं तुमइ कअं तुमए कअं त्वया कृतम् । एवं तइ तिअमित्यादि । ङि त्वयि स्थितम् ।

तुमम्मि च ङौ[3] ॥७७॥

[तुमम्मि च ङौ] भवति । तुमम्मि ठिअं[4] ॥

---

1 In A these two sūtras (nos. 71 and 72) are not found. The vṛtti of 72 is also not found.

2 Omitted by A.

3 A has either the sūtra or the vṛtti; but not both.

4 A has ठेअं.

ङसि तुह-तुज्झ-तुब्भ-तुम्हाः ॥७८॥

ङसि सिद्धस्य युष्मदः पदस्य तव इत्यस्य स्थाने पञ्चादेशा भवन्ति। तु धणं इत्यादि तव धनम् ॥

टि च दे ते ॥७९॥

टा-प्रत्यये ङस्-प्रत्यये च सति सिद्धस्य युष्मदः पदस्य त्वया इत्यस्य च स्थाने दे ते इत्येतौ भवतः। दे कअं ते कअं त्वया कृतम्। ए कअं दे कअं तु कअं त्वया कृतमित्येके। **तथा च काशिकावृत्तिः। आहुरे-दि-तु इत्येतान् आदेशान् युष्मदष्टायाम्** ॥

तुज्झेहि-तुब्भेहि-तुम्हेहि भिसि ॥८०॥

भिसि प्रत्यये सति सिद्धस्य युष्मदः पदस्य युष्माभिरित्यस्य एते त्रयो भवन्ति। तुज्झेहि कअं। तुब्भेहि कअं। तुम्हेहि कअं। युष्माभिः कृतम्। ते तुज्झेहि तुब्भेहि इत्येके ॥

ङसौ तत्तो-तइत्तो-तुमाओ-तुमाउ-तुमाहि ॥८१॥

ङसि प्रत्ययसिद्धस्य युष्मदः पदस्य त्वदित्यस्य स्थाने एते पञ्चादेशा भवन्ति। तत्तो अरणो। तइत्तो अरणो। तुमाओ अरणो। तुमाउ अरणो। तुमाहि अरणो त्वदन्यः ॥

तुज्झाहिंतो तुब्भासुंतो [भ्यसि[1]] ॥८२॥

भ्यसि सति सिद्धस्य युष्मदः पदस्य एतौ द्वौ भवतः। तुज्झाहिंतो अरणो तुब्भासुंतो अरणो। युष्मदन्ये। तुज्झेहिंतो तुब्भाहिंतो तुम्हेहिंतो तुज्झत्तो तुब्भत्तो तुज्झेहि तुब्भेहि तुज्झाहिंतो तुब्भासुंतो इत्यादेशा इत्येके। तुम्हाहिंतोऽपीति वा भटः ॥

वो ते तुज्झाणं तुम्हाणं आमि ॥८३॥

युष्माकमित्यस्य इत्येते च त्रय आदेशा भवन्ति। वो धनं ते धणं तुज्झाणं धणं तुब्भाणं धणं युष्माकं धनम् ॥

---

1 भ्यसि is not found in A.

तुज्झेसु-तुब्भेसु-तुम्हेसु सुपि ॥८४॥

सुपि सिद्धस्य युष्मदित्यस्य इत्येते च त्रय आदेशा भवन्ति। तुज्झेसु ठिअं। तुब्भेसु ठिअं। तुम्हेसु ठिअं। युष्मासु स्थितम् ॥

अस्मदो हं अहं अहअं सौ ॥८५॥

सौ सति सिद्धस्य पदस्याहमित्यस्य स्थाने हं अहं अहअं इत्येते आदेशा भवन्ति। हं जाणामि। अहं जानामि ॥

अम्मि स्मि च ॥८६॥

अमि सिद्धस्य सौ सिद्धस्य चास्मदः पदस्य स्थाने अम्मि इत्यादेशो भवति। अम्मि जाणामि। अहं जानामि। अम्मि पेच्छ। मां प्रेक्षस्व। **सौ मि इत्येके।** मि करोमि। अहं करोमि ॥

मं ममं च ॥८७॥

चानुकृष्टं नोत्तरसूत्रे। अमि सिद्धस्यास्मदः पदस्य मामित्यस्य स्थाने मं ममं इत्येतावादेशौ भवतः। मं रक्ख, ममं रक्ख। मां रक्ष। **मिमं णो अम अम्ह चैते** भवन्ति। मिमं रक्खउ। णो रक्खउ। अम्ह रक्खउ। मां रक्षतु ॥

अम्हे च जस्-शसोः ॥८८॥

जस्-शसोः सतोः सिद्धस्यास्मदः पदस्य स्थाने वयमित्यस्य अस्मानित्यस्य च स्थाने पूर्वोक्ताश्चत्वारः अम्हे च भवति। मिमं हसइ। णो हसइ। अम हसइ। अम्ह हसइ। अम्हे हसइ। अस्मान् हसति ॥

टि मइ मए ॥८९॥

टा-प्रत्यये सति सिद्धस्यास्मदः पदस्य स्थाने मइ मए इत्येतौ भवतः। मइ कअं मए कअं। **णे णि ङावपीत्येके।** णि दिट्ठं। णे दिट्ठं मया दृष्टम् ॥

ङावपि ॥९०॥

मयेत्यस्यास्मदः सिद्धस्यापि मइ मए इत्येतावादेशौ भवतः। मइ ठिअं। मए ठिअं। मयि स्थितम्। **ममम्मि चेत्येके।** मम्मि ठिअं मयि स्थितम् ॥

अम्हेहिं भिसि ॥९१॥

अस्माभिरित्यस्य भिसि सिद्धस्य स्थाने अम्हेहिं इत्यादेशो भवति। अम्हेहिं भणिअं। अस्माभिर्भणितम्। **णे अम्हे अम्ह अम्हाणं चेत्येके।** णे सुअं। अम्हे सुअं। अम्ह सुअं। अम्हाणं सुअं। अस्माभिः श्रुतम्॥

ङसो मत्तो मइत्तो ममाओ ममाउ ममाहि ॥९२॥

ङसौ सिद्धस्यास्मदः स्थाने एते पञ्च आदेशा भवन्ति। मत्तो अण्णो इत्यादि मदन्यः॥

अम्हाहिंतो अम्हासुंतो भ्यसि ॥९३॥

पञ्चमी-बहुवचनस्य भ्यस्यस्मद[अम्हाहिंतो अम्हासुंतो[1]] इत्यादेशद्वयं भवति। अम्हाहिंतो इअरे। अम्हासुंतो इअरे। अस्मदितरे। **अम्हेहिंतो अम्हेहि अम्हंतो इत्यपीत्येके॥**

ङसि मे मम मह मज्झ ॥९४॥

ङस्-प्रत्यये सति सिद्धस्यास्मदः पदस्य स्थाने मम इत्यैते चत्वार आदेशा भवन्ति। मे पिओ। मम पिओ। मज्झ पिओ। मम प्रियः॥

आमि णो अम्ह अम्हाण अम्हो ॥९५॥

अस्माकमित्यस्यैते चत्वार आदेशा भवन्ति। णो पई। अम्ह पई। अम्हाण पई। अम्हो पई। अस्माकं पतिः॥ **णे इति चेत्येके।** णे वल्लहो। अस्माकं वल्लभः॥

अम्हेसु सुपि ॥९६॥

अस्मास्वित्यस्य अम्हेसु इत्यादेशो भवति। अम्हेसु ठिअं। अस्मासु स्थितम्। **अनुस्वारष्टामोर्णादौ सप्तमि वा क्वचिदिति मैत्रेयः।** धम्मेण

---

1 Not found in AB.

धम्मेणं धर्मेण । जम्माण जम्माणं जन्मनाम् । कम्मेहि कम्मेहिं कर्मभिः । गामाउ गामाउं गामाहि गामाहिं ग्रामात् । सरेसु सरेसुं सरःसु । **एष्व-सत्यनुस्वारो वानुस्वारः ।** राआण राआणं राजानम् । अप्पाण अप्पाणं आत्मानम् । **अत्र सत्यनुस्वारो वानुस्वारः ।** तुम्हं तुम्ह तव । तुम्हाणं तुम्हाण युष्माकम् । तुम्हेसुं तुम्हेसु युष्मासु । तुम्हेहिं तुम्हेहि युष्माभिः । अम्हं अम्ह मम । अम्हाणं अम्हाण अस्माकम् । अम्हेसुं अम्हेसु अस्मासु । इत्यादौ **लक्षणानुरोधादनुस्वारोऽप्यनुस्वारः ॥**

द्वेर्दो ॥९७॥

सुपि परे द्वि-शब्दस्य दो भवति । दोहिं द्वाभ्याम् । दोसु द्वयोः ॥

त्रेस्ती च ॥९८॥

स्वादौ परे त्रेः स्थाने ती इत्ययमादेशो भवति । तीहिं त्रिभिः । तीसु त्रिषु ॥

तिण्णि जस्-शस्भ्याम् ॥९९॥

जस्-शस्भ्यां सह तिण्णि इत्यादेशो भवति । तिण्णि ठिआं । त्रयः स्थिताः । तिण्णि पेच्छ । त्रीन् प्रेक्षस्व ॥

द्वेर्दुवे दोण्णि वा ॥१००॥

जस्-शस्भ्यां सह द्वि-शब्दस्य दुवे दोण्णि इत्यादेशौ भवतः । दुवे ठिआ दोण्णि ठिआ । द्वौ स्थितौ । दुवे रक्ख दोण्णि रक्ख । द्वौ रक्ष । वे वेण्णि इत्यपि । वे हुवंतो वेण्णि हुवंतो । द्वौ भवतः । वे पेच्छ वेण्णि पेच्छ । द्वौ प्रेक्षस्व ॥

चतुरश्चत्तारो चत्तारि ॥१०१॥

चत्वारि-शब्दस्य स्थाने जस्-शस्भ्यां सह चत्तारो चत्तारि इत्येतावादेशौ भवतः । चत्तारो गेण्ह । चत्तारि गेण्ह । चतुरो गृहाण । जस्-शस्भ्यामिति किम् ? चऊहिं चतुर्भिः । चऊसु चतुर्षु ॥

एषामामो ण्हं ॥१०२॥

एषां द्वि-त्रि-चतुर्णामां प्रत्ययस्य स्थाने ण्हं इत्यादेशो भवति। दोण्हं द्वयोः। तेण्हं त्रयाणाम्। चउण्हं चतुर्णाम्। **कति-पञ्चादिशब्दानामामो ण्हं नैव दीर्घता**। कइण्हं कतीनाम्। छण्हं षण्णाम्। सत्तण्हं सप्तानाम्।

तिङश्च द्विवचनस्य[1] बहुवचनम् ॥१०३॥

सुपस्तिङश्च द्विवचनम् ओ-तस् प्रभृति बहुवचनं भवति। दोण्णि हत्था द्वौ हस्तौ। दोण्णि हत्थे पेच्छ। द्वौ हस्तौ प्रेक्षस्व। इत्यादि। तिङि। दे हुवंति। द्वौ भवतः। तुम्हे पढह। युवां पठथः। अम्हे जाणामो। आवां जानीवः॥

चतुर्थ्याः षष्ठी ॥१०४॥

चतुर्थ्याः षष्ठी भवति। बम्हणस्स देसु ब्राह्मणाय देहि। बम्हणीए देसु ब्राह्मण्ये देहि इत्यादि॥

न तादर्थ्ये प्रायः ॥१०५॥

तादर्थ्ये विहिताया चतुर्थ्याः प्रायः षष्ठी न भवति। गमणाअ उज्जतो गमनाय उद्यतः। देवाअ वली देवाय वलिः। इत्यादि। प्राय-ग्रहणमबहुत्वार्थम्। **क्वचिदन्यविभक्त्यर्थे दृश्यन्तेऽन्या विभक्तयः**। तथा चोक्तम्—व्यतयोऽप्यासामिति। तेन तृतीयार्थे सप्तमी। अच्छीसु पिज्जसि अक्षीभ्यां पीयसे। क्वचित् सप्तम्यर्थे द्वितीया। रत्ति दिट्ठो रात्रौ दृष्टः। **अन्यादृश्यपि वीप्सायां द्विरुक्तिः क्वापि दृश्यते**। अंगमंगाइं अङ्गान्यङ्गानि। अंगमंगाणं अङ्गमङ्गानाम्। अंगमंगेसु अङ्गमङ्गेषु। वच्च वच्चह व्रजत व्रजत। हो होइ भवति भवति। इत्यादि॥

इति श्रीविद्याविनोदाचार्यकृतौ प्राकृतपादे पञ्चमः परिच्छेदः॥

---

1 A reads द्विवचनं etc.

षष्ठः परिच्छेदः

अथ तिङ्विधिः

प्रथमैकवचनमिदेतौ ॥१॥

लडादीनां प्रथमैकवचनस्य स्थाने इदेतौ भवतः। विरमइ विरमए विरमति विरमते। रमइ रमए रमते। पेच्छइ पेच्छए प्रेक्षते प्रैक्षत प्रेक्षाञ्चक्रे वा। हसइ हसए अहसीत् अहासीत् जहास वा॥

मध्यमैकवचनस्य सिसे ॥२॥

मध्यमैकवचनस्य स्थाने सिसे इत्येतौ भवतः। तुमं जाणासि तुमं जानसे त्वं जानासि। तुमं वेवसि तुमं वेवसे त्वमवेपथाः।

उत्तमैकवचनस्य मिः ॥३॥

उत्तमैकवचनस्य मिर्भवति। अहअं तुअरामि अहं त्वरे। अहं जप्पामि अहं जल्पामि। **क्वचिल्लुटो मिकारस्यादिलोपो विकल्पितः।** अहअं हसं अहं हसामि। अहअं ण मरं अहं न म्रिये। पक्षे ण मरामि॥

न्ति-न्ते-हे-त्था-मो-मु म-बहुवचनस्य ॥४॥

लडादीनां परस्मैपदस्यात्मनेपदस्य बहुवचनस्य स्थाने न्ति न्ते हे त्था मो मु म इत्येते आदेशा भवन्ति। लुप्तविभक्तिक-पदत्रयनिर्देशात् क्रमनिग्रहात् प्रथम-बहुवचनस्य न्ति न्ते मध्यमबहुवचनस्य हे त्था उत्तमबहुवचनस्य मोमुम इति। पढंति पढंते पठन्ति। लहंति लहंते लभन्ते। तुज्झे भरह तुज्झे भरित्था यूयं स्मरथ। तुज्झे जुज्झह तुज्झे जुज्झित्था यूयं युध्यध्वम्। अम्हे वीहामो अम्हे वीहामु अम्हे वीहीम वयं बिभीमो बिभिमो वा। अम्हे वड्ढामो अम्हे वड्ढामु अम्हे वड्ढाम वयं वर्धामहे। **इरे इत्यपि वादेशः प्रथमस्य स्मृतो बुधैरिति वामनः।** सुसइरे सुहं शुष्यति सुखम्। पहुव्विरे रिउणो प्रभवन्ति रिपवः। दूमइरे रिरहिणो दूयन्ते विरहिणः॥

अत ए से ॥५॥

ए से इत्येतावकारादेव भवति। करए करोति कुरुते वा। तं गेण्हसे

त्वं गृह्णासि गृह्णीषे वा। अत इति किम्। सो हइ स भवति। तं होसि त्वं भवसि। सो भाइ स बिभेति। तं भासि त्वं बिभेषि। **अकारान्ता-न्नियम्येते न्त-माणौ क्वचिद् बुधैरिति वररुचिः।** हुवंते भवन्ति। हुवमाणो भवन्॥

अस्तेर्लोपः[1] ॥६॥

तिङादिषु प्रत्ययेषु परेषु प्रायो लक्ष्यवशाद् अन् अस् भुवीत्यस्य लोपो भवति। तं सि। पुत्तो सि। त्वमसि पुत्रोऽसि। प्राय इति किम्। अत्थि अस्ति॥

मिमोमुमानामधो[2] **हश्च** ॥७॥

मिमोमात्रयाणां मध्येऽन्ते हकारः प्रयोक्तव्यः। अस्तेर्लोपश्च। आणत्तोम्हि आज्ञप्तोऽस्मि। आणत्तम्हो आणत्तम्ह आज्ञप्ताः स्मः॥

यक इअ-इज्जौ ॥८॥

यकः स्थाने इअ-इज्जौ भवतः। णच्चिअइ णच्चिज्जइ तीए नृत्यते त्वया। गाइअइ मए गाइअए मए गाइज्ज मए गीयते मया।

लुगन्तर्हित्वादौ ॥९॥

अन्तर्हित्वादौ परे यको लुग् भवति। सक्कइ मए सक्कए[3] मए शक्यते मया। सुप्पइ तीए सुप्यते त्वया। लब्भइ सिविणो लभ्यते स्वप्नः। कीरइ क्रियते। हीरइ ह्रियते इत्याद्युन्नेयम्॥

न्त-माणौ शतृ-शानचोः ॥१०॥

शतृ-प्रत्ययस्य शानच्-प्रत्ययस्य च न्त-माणौ इत्येतावादेशौ भवतः। कुप्पंतो कुप्पमाणो कुप्यन्। खमंतो खममाणो क्षममाणः। **लस्य क्रियाति-पत्तौ वा न्त-माणावपि कुर्वत इति केचित्।** जइ पढंतो पंडिओ

---

1 After this A has प्रायः। 2 A reads मिमोमधो हश्च।

3 A has सक्कओ।

होंतो। जइ पढमाणो पंडिओ होमाणो। यदापठिष्यत् तदा पण्डितोऽभविष्यत्। पक्षे जइ पढिज्ज पंडिओ होज्जा॥

ई च स्त्रियाम् ॥११॥

स्त्रियां वाच्यायां सत्यां शतृ-शानचोः स्थाने ईकारादेशो भवति। च-कारात् न्त-माणावपि। कुणई कुर्वती कुर्वाणा वा। पक्षे कुणंती कुणमाणा॥

धातुभ्यो भविष्यति हिः ॥१२॥

भविष्यत्कालेषु लकारेषु धातुभ्य उत्तरे हिर्विकरणो भवति। लुट् लृट् आशीर्लिङ् इत्येते भविष्यत्कालविहिताः। **तथा च कातन्त्रम्—भविष्यन्त्याशीःश्वस्तन्यः** इति। काहिइ करिष्यति कर्ता क्रियाद् वा। काहिंति करिष्यन्ति क्रियासुः कर्तारो वा। तं काहिसि त्वं करिष्यसि कर्तासि क्रिया वा। तुम्हे काहित्था यूयं करिष्यथ क्रियास्त कर्तास्थ वा॥

उत्तमे स्सा हा च ॥१३॥

भविष्यद्विहित-लकाराणामुत्तमे परे स्सा हा इत्येतावादेशौ भवतः। चकाराद्धिकारोऽपि। अम्हे जाणिस्सामो अम्हे जाणिस्सामु। एवं जाणिहामो वयं ज्ञास्यामः ज्ञायास्म ज्ञातास्मो वा। एवमात्मने च॥

मिना स्सं वा ॥१४॥

भविष्यत्काले विहितलकाराणां मिणा आदेशेन सह स्सं इति विकरणो वा भवति। अहं चिणेस्सं हं चिणेहिमि हं चिणेस्सामि हं चिणेहामि। अहं चेष्यामि चीयासं चेतास्मि वा। एवमात्मने च॥

मो-मु-मै हिस्सा हित्था ॥१५॥

भविष्यत्कालविहित-लकाराणां मोमुमैवादेशैः सह हिस्सा हित्था इत्येतावादेशौ भवतः। मोमुमानेन सहास्य विकरणावेवावतिष्ठते इत्यर्थः। अम्हे किणिहिस्सा अम्हे किणिहित्था वयं केष्यामः क्रेयास्मः केतास्मो वा। एवमात्मने च। पक्षे उत्तमे स्सा हा चेत्येतत् सूत्रोदाहरणाण्येवोक्तानि। **लृटो यन्-मध्यमैकत्वं हित्था तेन सहेष्यते। काहित्था करिष्यसि करिष्यसे वा॥**

कृ-दा-श्रु-वचि-गमि-रुदि-दृशि-रूपाणां
काहं दाहं सोच्छं वोच्छं गच्छं रोच्छं दच्छं ॥ १६ ॥

कृ-दा-श्रु-वचि-गमि-रुदि-दृशि-रूपाणामेकवचनान्तानां काहं दाहं सोच्छं वोच्छं गच्छं रोच्छं दच्छं समानां धातूनां भविष्यदुत्तमैकवचनान्तानां रूपाणां स्थाने यथाक्रमेणैते समादेशा भवन्ति। क्वचिदन्येषामन्यत्र। मोच्छं मोक्ष्यामि। छेच्छं छेत्स्यामि। भोच्छं भोक्ष्ये। विच्छं वेदिष्यामि। लिङ्-लुटोरप्येवमुदाहार्यम् ॥

श्रवादीनां त्रिष्वनुस्वारवर्जं हिलोपश्च वा ॥ १७ ॥

श्रु इत्यादीनां धातूनां श्रु-वचि-गमि-रुदि-दृशीनां त्रिष्वपि प्रथम-मध्यमोत्तमेषु यथाक्रमं पूर्वोक्ता आदेशा अनुस्वारवर्जं भवन्ति। तत्र वादेशा अनुस्वाररहिता भवन्तीत्यर्थः। हि-विकरणस्य लोपो वा स्यात्। सोच्छिंति सोच्छिहिंति श्रोष्यन्ति। सोच्छिसि सोच्छिहिसि श्रोष्यसि। सोच्छिह सोच्छिहिह सोच्छित्था सोच्छिहित्था श्रोष्यथ। सोच्छिमि सोच्छिहिमि श्रोष्यामि। सोच्छिमो सोच्छिहिमो श्रोष्यामः। एवं वच्यादीनामप्युदाहार्यम्। लिङ्-लुटोरप्येत एव प्रयोगाः ॥

उ सु मु लोड्विध्यादि-लिङोरेकस्मिन् ॥ १८ ॥

लोटो विध्यादिलिङश्च त्रयाणां प्रथम-मध्यमोत्तमानामेकस्मिन्नेकवचने विहितानां स्थाने यथाक्रमं उसुमु इत्येते आदेशा भवन्ति। कुणउ करोतु कुर्यात् कुर्वीत वा। तुमं कुणसु त्वं कुरु कुरुष्व कुर्याः कुर्वीथा वा। अहअं कुणमु अहङ्करवाणि करवै कुर्यां कुर्वीय वा ॥ मध्यमैकवचनं स्यादिति वामनः। तुमं भिंधि त्वं भिन्धि। तुमं छिंद त्वं छिन्धि ॥ लिङप्येवम्। तुमं भिंद त्वं भिन्दस्व। तुमं छिंद त्वं छिन्दस्व। तुमं लह त्वं लभस्व। लिङप्येवम्। एदु एदु पियसही एतु एतु प्रियसखी इयादियादित्येते ॥

न्तु-ह-मो बहुषु ॥ १९ ॥

लोटो विध्यादि-लिङश्च बहुषु बहुवचनेषु विहितानां त्रयाणां पुरुषाणां स्थाने यथाक्रमं न्तु ह मो इत्येते आदेशा भवन्ति। तूसंतु तुष्यन्तु तुष्येयुर्वा। तूसह तुष्यत। तूसामो तुष्यामः। विसंतु प्रसन्ताम्। विसह प्रसध्वम्। विसामो प्रसामहे। लिङप्येवम्॥

लट्लृटोश्च ज्ज ज्जा वा ॥ २० ॥

एकस्मिन् बहुष्विति द्वयमनुवर्तते। लोट्-विध्यादिलिङोर्लट्लृटोश्च एकवचने चोत्पन्नानां प्रत्ययानां ज्ज ज्जा इत्येतावादेशौ भवतः। एसो मुणेज्ज एसो मुणेज्जा एष जानाति जानीते वा। पक्षे एसो मुणए वा। एदे मुणेज्ज एदे मुणेज्जा एते जानन्ति जानते वा। पक्षे एदे[1] मुणंति। तुमं मुणेज्ज तुमं मुणेज्जा त्वं जानासि जानीषे वा। पक्षे तुमं मुणसि मुणसे वा। तुम्हे मुणेज्ज तुम्हे मुणेज्जा यूयं जानीथ जानीध्वे वा। पक्षे तुम्हे मुणह। अहअं मुणेज्ज मुणेज्जा अहं जानामि जाने वा। पक्षे अहअं मुणामि। अम्हे मुणेज्ज अम्हे मुणेज्जा वयं जानीमः जानीमहे वा। पक्षे अम्हे मुणिमो।[2] लुटि। एसो णच्चावेज्ज एसो णच्चावेज्जा एष नर्तयिता। पक्षे णच्चावेहिइ। एदे णच्चावेज्जा एते नर्तयितारः। एदे णच्चावेहिंति। तुमं णच्चावेज्ज तुमं णच्चावेज्जा त्वं नर्तयितासि। पक्षे तुमं णच्चावेहिसि[3]। तुज्झे णच्चावेज्ज तुज्झे णच्चावेज्जा यूयं नर्तयितास्थ नर्तयिताद्वे वा। पक्षे तुज्झे णच्चावेत्था। हं णच्चावेज्ज[4] हं णच्चावेज्जा अहं नर्तयितास्मि नर्तयिताहे वा। पक्षे हं[3] णच्चावेस्सं। अम्हे णच्चावेज्ज अम्हे णच्चावेज्जा वयं नर्तयितास्मः नर्तयितास्महे वा। पक्षे णच्चावेहिस्सा। लृटि तु णच्चावेहिइ णच्चावेहिंति इत्यादि। लोटि। सो कुणेज्ज सो कुणेज्जा स करोतु स कुरुतां वा। लिङयप्येवम्। सव्वो

1 A drops एदे. 2 A has मुणमो 3 Not found in A. 4 After this A has repeated the lines, e.g. तुमं णच्चावेज्ज etc. upto हं णच्चावेज्जा.

कुणेज्ज सव्वो कुणेज्जा सर्वे कुर्वन्तु सर्वे कुर्वन्तां वा। पक्षे सव्वे कुणंतु। तुमं कुणेज्ज तुमं कुणेज्जा त्वं कुरु त्वं कुरुष्व वा[1]। पक्षे तुम्हे कुणह। हं कुणेज्ज हं कुणेज्जा अहं करवाणि करवै वा[1]। अहअं कुणामु। अम्हे कुणेज्ज अम्हे कुणेज्जा वयं करवामः करवामहै वा[1]। पक्षे अम्हे कुण। लिङ्हेतौ लिङ्विधानात्तत्राप्येवं द्रष्टव्यम्। यथा जइ भुञ्जेज्ज थिप्पेज्ज। यदा भोक्ष्यन्ते तदा अतर्पस्यत। पक्षे जइ भुञ्जं ते थिप्पंतो। ज्जहि ज्जो चैव दृश्येते विध्यादिष्वपि वा क्वचित्। कुणेज्जहि कुणेज्जा करोतु कुरुतां वा। कुर्यात् कुर्वीत इत्यादिषु सर्ववचनेष्वेतावेव प्रयोगौ द्रष्टव्यौ इति वररुचिः। पक्षे सर्वेषु वचनेषु इज्ज हिश्च सह स्यातां भविष्यति। मए सो सुमरिज्जिजहिइ मया स स्मरिष्यते। मए तुमं सुमरिज्जिजहिसि मया त्वं स्मरिष्यसे। तए अहअं सुमरिज्जिजहिमि त्वयाहं स्मरिष्ये। मए एदे सुमरिज्जिजहिंति मया एते स्मरिष्यन्ते। मए तुम्हे सुमरिज्जिजहिह मया यूयं स्मरिष्यध्वम्। तए अम्हे सुमरिज्जिजहिमो त्वया वयं स्मरिष्यामहे॥

मध्ये च॥ ७१॥

पूर्वोक्त-लकारेषु लट्-लुट्-लोट्-विध्यादिषु लिङ्सु परेषु धातोर्मध्ये ज्ज-ज्जा इत्येतौ विकरणौ वा भवतः। सो देज्जइ स ददाति। पक्ष सो देज्ज सो देज्जा विकरणादेशाभ्यामन्यत्र सो देइ। ज्जा-विकरणः प्रायिक इति कात्यायनः[2]। तेन यत्र विकरणः तत्र ते देज्जंति ते ददति ददते वा। पक्षे ते देज्ज। विकरणादेशाभ्यामन्यत्र ते देंति। एवं मध्यमोत्तमपुरुषयो रप्युदाहार्यम्। लुटि। सो होज्जइ स भविता। पक्षे सो होज्ज सो होज्जा विकरणादेशाभ्यामन्यत्र [सो][3] होहिइ। ते होज्जंति ते भवितारः। पक्षे ते होज्ज ते होज्जा। विकरणादेशाभ्यामन्यत्र ते होहंति। एवं मध्यमोत्तम-

1 After this A has लिङ्पप्येवम्. 2 A has कात्य:। 3 Not found in A.

योरपि। लोट्। एसो लेज्जाउ एसो लेज्ज। लिङप्येवम्। पक्षे एसो लेज्ज एसो लेज्जा। एवमन्यत्राप्युदाहार्यम्॥

नानेकाचः॥ २२॥

अनेकाचो धातोर्मध्ये ज्ज-ज्जा इत्येतौ विकरणौ भवतः। घोलेज्ज घोलेज्जा घूर्णते। पक्षे घोलइ घोलए। एवमन्यत्राप्युक्तम्। अनेकाचोऽपि विध्यादौ ज्ज-ज्जा मध्ये तु दृश्यते। कुणेज्जसु कुणेज्जासु कुरु कुरुष्व कुर्याः कुर्वीथा वा॥

ईअ भूते॥ २३॥

भूतकाले विहितानां लङ्-लिङ्-लुङामनेकाचो धातोः परेषाम् ईअ इत्यादेशः स्यात्। एकस्मिन् बहुष्वित्यनुवृत्तेः सर्वेषु वचनेषु विधीयते। हुवीअ अभवद् बभूव अभूद्वा। लहीअ अलब्ध अलभत लेभे वा।

एकाचो हीअ॥ २४॥

भूतविहितस्य तिङ् स्थाने हीअ इत्यादेशो भवति। होहीअ अभवद् बभूव अभूद्वा। काहीअ अकरोद् अकुरुत वा अकार्षीद् अकृत वा। सोहीअ शृणोतीत्यादि॥

आसिरस्तेस्तिङा॥ २५॥

भूतकाले विहितेन तिङा सहास्तेः स्थाने आसिर्भवति। आसि राअणो आसीद् रावणः। बभूव अभूद्वा। बहुलवचनादप्येवम्॥

णिच एदादेरात्॥ २६॥

णिचः स्थाने एद्भवति। धातोरादेः स्थाने आच्च। कारेइ कारयति कारयते वा। पाढेइ पाठयति पाठयते वा॥

आवे च ॥ २७ ॥

धातोरुत्तरे णिचः स्थाने आवे इत्यादेशो भवति। पृथग् उक्तकरणादादेत्वाभावः। करावेइ कारयति कारयते वा। पढावेइ पाठयति पाठयते वा ॥

आविः क्त-भाव-कर्मसु वा ॥ २८ ॥

क्त-प्रत्यये भावविहित-प्रत्यये कर्मविहित-प्रत्यये च परे आविरादेशो भवति। वा-वचनादादेराच्च। पक्षे न तु एदाव इत्येतौ भवतः। नैदावे इति प्रतिषेधस्य वक्ष्यमाणत्वात्। हसाविओ हासितः। पक्षे हासिओ। पढाविओ पाठितः। पक्षे पाढिओ। केचित्तु यत्र आविरादेशस्तत्रापि लक्ष्यवशादात्वमिच्छन्ति। हासाविओ पाढाविओ। भावकर्मणोर्यथा। चोरावीअइ चोराविज्जइ चौर्यते। चिंतावीअइ चिंताविज्जइ चिन्त्यते। धारावीअइ धाराविज्जइ धार्यते। धृञ् अवस्थाने इति[1] धातोः[2] अरादेशः।[3] पक्षे चोरिअइ चोरिज्जइ चिंतिअइ चिंतिज्जइ धारिअइ धारिज्जइ। त्वर् त्वरणे इत्यादौ तुरोविअं इत्यादि केचिन्न मन्यन्ते ॥

नैदावे ॥ २९ ॥

क्त-भावे कर्मसु परे णिचः स्थाने एदाव इत्यादौ न भवतः। हसाविओ हसितः। पक्षे हासिओ हसाविअइ हसाविज्जइ हासिअइ हासिज्जइ हास्यते ॥

अत आदुत्तम-वचने वा ॥ ३० ॥

उत्तमपुरुषैकवचने परेऽतः स्थाने आद्वा भवति। जाणामि जाणेमि जानामि जाने वा। सहामि सहेमि सहे ॥

---

1 A drop it. 2 A has धातुः क्तः. 3 Not found in A.

इच्च बहुवचने ॥ ३१ ॥

उत्तमपुरुषबहुवचने परेऽतः स्थाने आद्वा भवति इच्च। णिअच्छामो णिअच्छिमो पश्यामः। लहामो लहिमो लभामहे।

क्ते ॥ ३२ ॥

क्त-प्रत्यये परेऽतः स्थाने इद्भवति ॥ भविअं भूतम्। जाणिअं ज्ञातम्। पढिअं पठितम् ॥

ए च क्त्वा-तुमुन्-तव्यङ्-भविष्यत्सु ॥ ३३ ॥

क्त्वा-तुमुन्-तव्यङ्-भविष्यत्-कालविहित-प्रत्ययेषु परेषु धातोरेतः स्थाने इकारो भवति। एकारादेशश्च। हरिऊण हरेऊण हृत्वा। हरिउं हरेउं हर्तुम्। हरिअव्वं हरेअव्वं हर्तव्यम्। हरिहिइ हरेहिइ हरिष्यति ॥

वा लडादावादिष्टे ॥ ३४ ॥

कृतादेशलडादौ परेऽतः स्थाने एद्वा स्यात्। हसेइ हसइ हसति। रमेइ रमइ रमते। खामेंतो खमंतो क्षयमाण। वढेंति वढंति वर्धन्ते। विरमेउ विरमतु। तुमं विरमेसु विरमसु त्वं विरम ॥

इति विद्याविनोदाचार्यकृतौ प्राकृतपादे तिङ्विधिः षष्ठः परिच्छेदः ॥

सप्तमः परिच्छेदः

अथ धातुविधिः

भुवो होहुवौ ॥ १ ॥

भू सत्तायामित्यस्य स्थाने हो-हुव इत्येतावादेशौ भवतः। होइ हुवइ भवति। होंति हुवंति भवन्ति ॥

क्ते हूः ॥ २ ॥

क्ते परे भुवः स्थाने हूरादेशो भवति। हूअं भूतम्। असंदूरदुश्च प्रादेः। संदुर् उद् इत्येतैर्वर्जितात् प्रादेरुत्तरस्य भुवः स्थाने क्ते परे हूरादेशो भवति। परिहूओ परिभूतः अणुहूओ अनुभूतः। समादेस्तु संभूओ संभूत इत्यादि। णिहिहूओ निधिभूत इत्येके॥

प्रादेर्भवः ॥ ३ ॥

प्रादेरुत्तरस्य भुवः स्थाने भवादेशो भवति। हो-हुवयोर्बाधकोऽयम्। पहवेइ पहवए प्रभवति। पहवंति पहवेंति प्रभवन्ति॥ संभवइ संभवए सम्भवति। संभवंति संभवेंति सम्भवन्ति। क्वचिदप्रादेश्च। भवेइ भवइ भवति। प्रादे हुव्व इत्येके। पहुव्वेइ पहुव्वइ॥

त्वरस्तुवरः ॥ ४ ॥

ञित्वरा संभ्रम इत्यस्य स्थाने तुवर इत्यादेशो भवति। तुमं तुवरसे त्वं त्वरसे। पक्षे तुमं तुवरेसि तुमं तुवरसि॥

घुर्णो घोल-घुम्मौ ॥ ५ ॥

घुण घूर्ण भ्रमण इत्यस्य घोल-घुम्म इत्येतावादेशौ भवतः। घुण्णमाणो घुम्मंतो घूर्णमानः॥

णुदो णोल्लः ॥ ६ ॥

नुद प्रेरण इत्यस्य णोल्ल इत्यादेशो भवति। पणोल्लिअं प्रणुन्नम्॥

दूङो दूमश्च ॥ ७ ॥

टुदूङ् रतिभाव इत्यस्य स्थाने दूमादेशो भवति। अहअं दूमायि दूये॥

पाटेः फालः ॥ ८ ॥

पट गताविति धातोः स्थाने फाल इत्यादेशो भवति। तुम्हे फालावेइ यूयं पाटयथ। फालाविअं पाटितम् ॥

वृषादीनामृतोऽरिः ॥ ९ ॥

वृष सेचन इत्यादीनां ऋतस्य स्थानेऽरिरादेशो भवति। एसो वरिसउ वर्षतु। तुमं वरिससु त्वं वर्ष। वरिसेऊण वर्षित्वा। मरिसअव्वं मर्षितव्यम्। करिसइ कर्षति। वृषादीनामिति असर्वविषयतासूचनार्थम्। यथा णच्चइ नृत्यति ॥

अन्तेऽरः ॥ १० ॥

धातोरन्ते वर्तमानस्य ऋतस्यान्तेऽर इत्यादेशो भवति। अम्हे हरिमो अम्हे हरामो वयं हरामः। वरिमो वरामो वृणेमो वृणीमहे वा। धर धरइ ध्रियते। धृङ् अवस्थाने धातुः ॥

कृञः कुणश्च ॥ ११ ॥

कुणइ कुणए करोति कुरुते वा। पक्षे करइ करए वा ॥

जृम्भेर्जम्भा ॥ १२ ॥

जृम्भेः जंभा भवति। जंभाअइ जृम्भते। जृम्भेति चादेशः सोपसर्गस्य नेष्यते। आअंभइ आजृम्भते ॥

ग्रहेर्गेण्हः ॥ १३ ॥

ग्रहेर्गेण्हो भवति। गेण्हइ गृह्णाति। गेण्हिज्जइ गृह्यते ॥

घेत्त क्त्वा-तुमुन्-तव्येषु ॥ १४ ॥

क्त्वादिषु परेषु ग्रहेर्घेत्त भवति। घेत्तूण गृहीत्वा। घेत्तुं ग्रहीतुं घेत्तव्वं ग्रहीतव्यम् ॥

कृञः का भूत-भविष्यतोः ॥ १५ ॥

क्त्वादिषु परेषु भूत-भविष्यत्-काले विहिते च प्रत्यये परे कृञः स्थाने कादेशो भवति। काहीअ अकरोत् अकार्षीत् चकार वा। काहिइ करिष्यति कर्ता क्रियाद्वा। क्त्वा। काऊण। तुमङ्। काउं। तव्यङ्। काअव्वं॥

स्मरते भर-सुमरौ ॥ १६ ॥

स्मरतेर्भर-सुमरौ भवतः। भरिस्सं सुमरिहिमि स्मरिष्यामि॥

भियो भावीहौ ॥ १७ ॥

ञिभी भय इत्यस्य स्थाने भा-वीह इत्येतौ भवतः। भाइ वीहइ बिभेति। भियो वीह इत्यादेशः क्तेऽपि भवत्विति वामनः। भीओ वीहिओ भीतः॥

म्लो वा-वाअ ॥ १८ ॥

म्लै गात्रविनामे इत्यस्य स्थाने वा-वाअ इत्यादेशौ भवतः। वाइ वाअइ म्लायते। वाअं वाइअं म्लानम्॥

तृपस्थिप्पः ॥ १९ ॥

तृप् प्रीणने इत्यस्य स्थाने थिप्पादेशो भवति। थिप्पंतो थिप्पमाणो तृप्यन्। थिप्पई तृप्यन्ती॥

ज्ञो जाण-आणौ ॥ २० ॥

ज्ञा स्थाने जाण-आणौ भवतः। तुम्हे जाणइ तुम्हे जाणित्था यूयं जानीथ जानीध्वं वा। णापीत्येके णाइ जानाति। णाअं ज्ञातं णाऊण ज्ञात्वा॥

घटे गढः ॥ २१ ॥

घट चेष्टायामित्यस्य गढादेशो भवति। गढइ घटते॥

समोगलः ॥ २२ ॥

संपूर्वाद् घटतेर्गलादेशो भवति। संगलइ संघटते॥

स्रंसो ल्हसः ॥ २३ ॥

स्रंसु अधःपतन इत्यस्य स्थाने ल्हसादेशो भवति। ल्हसइ ल्हसए स्रंसते॥

नेः सदः सज्जः ॥ २४ ॥

नेरुत्तरस्य पद विशरणादावित्यस्य सज्जादेशो भवति॥ णिसज्जइ निषीदति॥

आङो रभे ढवश्च ॥ २५ ॥

आङ् उत्तरस्य रभ् राभ् इत्यस्य ढवो भवति॥ आढवइ आढवए आरभते। आढविअं आरब्धम्। आढत्तमित्यप्यन्ये॥

उदि शलेः थल्लो वा ॥ २६ ॥

उदि उपसर्गे सति शल चल पतन गतावित्यस्य स्थाने थल्लादेशो भवति वा॥ उत्थल्लइ उच्छलति। पक्षे उच्छलइ॥

पिबतेर्घोटश्च ॥ २७ ॥

पा पान इत्यस्य स्थाने घोटादेशो भवति। घोटइ पिबति। पक्षे पिबइ पिअइ॥

जल्पेर्लोमश्च ॥ २८ ॥

जल्प[1] व्यक्तायां वाचीत्यस्य लकारस्य मकारो भवति। जंपिरो जल्पनशील इत्यर्थः। जंपिअं जल्पितम्॥

स्था-ध्या-गानां ठाअ-झाअ-गाआः ॥ २९ ॥

ष्ठा गति-निवृत्तौ ध्यै चिन्तायां गै शब्दे इत्येतेषां स्थाने यथाक्रमं ठाअ झाअ गाअ इत्येते आदेशा भवन्ति। ठाअइ तिष्ठति। झाअइ ध्यायति। गाअइ गायति। ठाइअ स्थित्वा। झाइअ ध्यात्वा। गाइअ गीत्वा॥

---

1. Before this A reads जप as well.

ठा-झा-गाश्च लट्-लोड्-विध्यादि-लिङाशीर्लिङ्-लुट्-लृटे-कवचने ॥ ३० ॥

लडादीनामेकवचने परे स्था-ध्या-गा इत्येतेषां स्थाने ठा-झा-गा इत्येते भवन्ति। चकारात् पूर्वोक्ताश्च। लट्। ठाइ ठाअ ठाअइ तिष्ठति। एवं झाइ झाअ झाअइ। गाइ गाअ गाअइ। लोट्। ठाउ ठाअउ तिष्ठतु। झाउ झाअउ ध्यायतु। गाउ गाअउ गायतु। लिङ्यप्येवम्। आशीर्लिङ्। ठाहिइ स्थेयात्। लुट्-लृटोरप्येवम्। एकवचन इति किम्? ठाअंति झाअंति गाअंति ॥

खादि-धाव्योः खा धा ॥ ३१ ॥

लडाद्येकवचने परे खाद भक्षणे धावु गति-शुद्ध्योरित्येतयोः स्थाने यथा-क्रमं खा-धा इत्येतौ भवतः। तुमं खासि त्वं खादसि। तुमं धासि त्वं धावसि। अहअं खामु अहअं धामु अहं खादानि अहं धावानि। लिङ्यप्येवम्। आशीर्लिङ्। खाहिइ खाद्यात्। धाहिइ ध्यायात्। लुट्-लृटोरप्येवम्। एकवचन इति किम्? खाअंतु खादन्तु। धाअंतु धावन्तु। धावेत्येके। धाविहिइ धाविष्यति। धाइ धावइ धावति। धाउ धावउ धावतु ॥

ग्रसेर्विसः[1] ॥ ६२ ॥

ग्रसु अदन इत्यस्य स्थाने विसादेशो भवति। अम्हे विसिस्सामो अम्हे विसिहामो वयं ग्रसिष्यामः ॥

चिञश्चिणः ॥ ३३ ॥

चिञ् चयन इत्यस्य स्थाने चिणादेशो भवति। चिणेइ चिणइ चिनोति चिनुते वा। चिव्वइअ वा क्वचिदित्येके। उच्चेअइ उच्चिनोति। पक्षे पूर्वोदाहरणमेव ॥

1. Vasantarāja विसः ॥ A. विस। But compare 6.19 for विस।

क्रीञः किणः ॥ ३४ ॥

डुक्रीञ् द्रव्य-विनिमय इत्यस्य स्थाने किणादेशो भवति। किणइ किणए क्रीणाति क्रीणीते वा ॥

वेः के च[1] ॥ ३५ ॥

वेरुत्तरस्य क्रीञः स्थाने के[2] भवति। चकारात् पूर्वोक्तादेशाः। विक्केइ विक्किणइ विक्रीणीते। विक्केंतो विक्किणंतो विक्रीणानः ॥

उदोध्मो धूमा ॥ ३६ ॥

ध्मा शब्दाग्निसंयोगयोरित्यस्योत् पूर्व धूम इत्यादेशो भवति। उद्धूमाइ उद्धमति ॥

श्रदो धो दहः ॥ ३७ ॥

श्रत्पूर्वस्य डुधाञ् धारण-पोषणयोरित्यस्य स्थाने दहो भवति। सद्दहइ श्रद्धधाति ॥

अवाद् गाहेर्वाहः ॥ ३८ ॥

अवपूर्वस्य गाहू विलोडने इत्यस्य स्थाने वाह भवति। ओवाहइ अवगाहते। पक्षे अवआहइ। अवादिति किम्? गाहइ ॥

काशेर्वासः ॥ ३९ ॥

अवादुत्तरस्य काशृ दीप्तावित्यस्य स्थाने वासो भवति। ओवासइ अवआसइ ओवासए अवआसए अवकाशते। ओवासिअं अवआसिअं अवकाशितम्। अवादित्येव। कासइ ॥

निरो माङो माण-मवौ ॥ ४० ॥

निरुपसर्गादुत्तरस्य माङ् मान इत्यस्य स्थाने माण-मावौ भवतः। णिम्माणेइ णिम्माणए णिम्मावइ णिम्मावए निर्मिमीते। सम्माणेइ सम्मानयतीति तु मानपूजायामित्यस्य रूपम्। क्वचिद्धे त्येके। णिम्माणेऊण णिम्माविऊण निम्मिऊण निर्माय ॥

---

1. A. केश्च ॥ 2. A. केः ॥

पदेर्वलः ॥ ४१ ॥

निरुत्तरस्य पद गतावित्यस्य स्थाने वलादेशो भवति। णिव्वलइ निष्पद्यते ॥

क्षियो झिज्ज ॥ ४२ ॥

क्षि क्षय इत्यस्य स्थाने झिज्ज आदेशो भवति। झिज्जइ क्षीयते ॥

भिदि-छिदोरन्त्यस्य न्दः ॥ ४३ ॥

भिदिर् विदारणे छिदिर् द्वैधीकरण इत्यस्य चान्त्यस्य स्थाने न्दो भवति। तुमं भिंदसु तुमं छिंदसु त्वं भिन्धि त्वं छिन्धि। क्वचिद्भवत्येके। भेत्तूण छेत्तूण भित्त्वा छित्त्वा। पक्षे भिंदिऊण छिंदिऊण ॥

क्वथेर्ढः ॥ ४४ ॥

क्वथ् निष्पाक इत्यस्यान्त्यस्य वर्णस्य स्थाने ढो भवति। कढइ क्वथयति ॥

वेष्टेश्च ॥ ४५ ॥

वेष्ट वेष्टन इत्यस्यान्त्यस्य वर्णस्य स्थाने ढो भवति। वेढइ वेढए वेष्टते ॥

उन्-समोर्ल्लः ॥ ४६ ॥

उदः समश्चोत्तरस्य वेष्टतेरन्त्यस्य वर्णस्य द्वित्वापन्नो लो भवति। उव्वेल्लइ उद्वेष्टते। संवेल्लइ संवेष्टते ॥

रुदो वः ॥ ४७ ॥

रुदिर् अश्रुविमोचन इत्यस्यान्त्यस्य वर्णस्य वो भवति। रुवइ रोदिति। रोवइ इत्येके। रुइरा रोदनशीला ॥

उदो विजेः ॥ ४८ ॥

उदुत्तरस्य ओविजी भय-चलनयोरित्यस्य वर्णस्य वो भवति। उव्वेवइ उव्वेवए उद्विजते ॥

वृधेर्ढः ॥ ४९ ॥

वृधु वृद्धावित्यस्यान्त्यस्य वर्णस्य द्वित्वापन्नो ढो भवति। वड्ढइ वड्ढए वर्धते ॥

हन्तेर्म्मः[1] ॥ ५० ॥

हन् हिंसा-गत्योरित्यस्यान्त्यस्य वर्णस्य द्वित्वापन्नो मकारो भवति। हम्मइ हम्मए हन्यते ॥ भाव-कर्मणोरेवायं विधिः कर्तर्यनभिधानात्। तेन हणइ हन्ति, हंतव्वं हन्तव्यम्, हओ हतः, हतूण हत्वा इत्यादीत्येके॥ खनेः क्वापि म्म इत्येतस्यान्त्यस्य हनेरिति वाणः। खम्मइ खायते खन्यते वा। क्वापीतिवचनात् खणिअइ खणिज्जइ ॥

रुषादीनां दीर्घः ॥ ५१ ॥

रुष् रोष इत्यादीनामुपान्तस्य दीर्घो भवति। रूसइ रूसए रुष्यते। तूसइ तुष्यति। सूसइ शुष्यति। दूसेइ दूषयति। रुषादीनामिति किम्? रुवइ रोदिति ॥

च्चो व्रजि-नृत्योः ॥ ५२ ॥

व्रज गतावित्यस्य नृती गात्रविक्षेप इत्यस्य चान्तस्य वर्णस्य स्थाने द्वित्वापन्नश्चकारो भवति। वच्चइ व्रजति। णच्चइ नृत्यति। णट्टमिति नटः शब्दस्य रूपम् ॥

युधि-बुधि-गृधि-सिधि-क्रुधीनां ज्झः ॥ ५३ ॥

एषा पञ्चानामन्त्यस्य वर्णस्य स्थाने ज्झो भवति। जुज्झंति युध्यन्ते। बुज्झंति बुध्यन्ति। गिज्झंति गृध्यन्ति। सिज्झंति सिद्ध्यन्ति। कुज्झंति क्रुध्यन्ति ॥

---

1. A has म्मो हन्ते ॥ I have changed the order in conformity with the previous sūtra which is also corroborated by that of Vasantarāja.

रुधेर्न्धम्भौ ॥ ५४ ॥

रुधिर् आवरण इत्यस्यान्त्यस्य स्थाने न्ध-म्भ इत्येतौ भवतः। रुंधइ रुंभइ रुणद्धि। रुधो न्ध-म्भौ क्वचिन्नैव क्वचिज्झो भाव-कर्मणोः। रुद्धो रुद्धः। रुज्झइ रुध्यते ॥

मृदोलः ॥ ५५ ॥

मृद क्षोद इत्यस्यान्त्यस्य स्थाने लो भवति। मलइ मलए मृद्नाति।

शदि-पत्योर्डः ॥ ५६ ॥

शद्लृ शातने पत्लृ गतौ इत्येनयोरन्त्यस्य वर्णस्य डो भवति। सडइ शीयते पडइ पतति ॥

शकादीनां द्वित्वम् ॥ ५७ ॥

शक् शक्तावित्यादीनामन्त्यस्य द्वित्वं भवति। सक्कइ सक्कए शक्नोति। सक्कइ मए शक्यते मया। लग्गइ लगति। मग्गइ मृग्यते ॥

स्फुट-चलोर्वा ॥ ५८ ॥

स्फुट विकसन इत्यस्य चल् कम्पन इत्यस्य चान्त्यस्य स्थाने द्वित्वं वा स्यात्। फुट्टइ फुटइ स्फुटति। चल्लइ चलइ चलति। फुट्टो फुटिओ स्फुटितः। फुट्ट इति तु दिण्णादिपाठात्। चलिओ चलितः। फुट्टइ वुत्त-वत्तम्मि इति फुट्ट-धातोः प्रयोगः ॥

उपसर्गान्मीलः ॥ ५९ ॥

उपसर्गात् परस्य मील क्षण-निमेषण इत्यस्यान्त्यस्य द्वित्वं वा भवति। पमिल्लइ पमीलइ प्रमीलति। संमिल्लइ संमीलइ संमीलति। उंमिल्लइ उंमीलइ उन्मीलति। उपसर्गादिति किम्? मीलइ मीलति।

भुजादीनां क्त्वा-तुमुन्-तव्यत्सु लोपः ॥ ६० ॥

भुज पालनाभ्यवहारयोरित्यादीनामन्त्यस्य लोपो भवति। भोत्तूण भुक्त्वा। भोत्तुं भोक्तुम्। भोत्तव्वं भोक्तव्यम्। मोत्तूण मुक्त्वा। मोत्तुं मोक्तुम्। मोत्तव्वं मोक्तव्यम्। रोत्तूण रुदित्वा। रोत्तुं रोदितुम्। रोत्तव्वं रोदितव्यम् ॥

श्रु-हु-जि-लू-धूञां णोऽन्ते ह्रस्वः ॥ ६१ ॥

श्रादीनां पञ्चानामन्ते ण-कारः प्रयोक्तव्यः। ह्रस्वश्च।[1] सुणइ शृणोति। हुणइ जुहोति। हुणंतो जुह्वत्। जिणइ जयति। लुणइ लुणेइ लुनाति लुनीते वा। लुणिअव्वं लवितव्यम्। धुणइ धुणेइ धुनाति धुनीते वा। क्वचिद्वा। सुणिऊण सोऊण श्रुत्वा।[2] जिणिऊण जेऊण जित्वा। क्वचिदन्यत्रापि। थुणइ स्तौति। थुणिऊण स्तुत्वा ॥

भावकर्मणोर्व्वश्च ॥ ६२ ॥

भावे कर्मणि च वाच्ये श्रादीनामन्ते व्व इति प्रयोक्तव्यः। चकाराण्णश्च दीर्घो ह्रस्वश्च। सुव्वइ श्रूयते। सुणिअइ सुणिज्जइ इत्यादि। एवं हुव्वइ हुणिअइ हुणिज्जइ हूयते। जिव्वइ जिणिअइ जिणिज्जइ जीयते। लुव्वइ लुणिअइ लुणिज्जइ लूयते। धुव्वइ धुणिअइ धुणिज्जइ धूयते ॥

गमादीनां द्वित्वं वा ॥ ६३ ॥

भावे कर्मणि चार्थे गमादीनामन्त्यस्य द्वित्वं वा भवति। गम्मइ गम्यते। पक्षे गमिअइ गमिज्जइ। लब्भइ लभ्यते। पक्षे लहिअइ लहिज्जइ। रम्मइ रम्यते। पक्षे रमिअइ रमिज्जइ। भण्णइ भण्यते। पक्षे भणिअइ भणिज्जइ। आकृतिगणोऽयम् ॥

---

1. Vasantarāja ह्रस्वश्च ॥ 2. After this A repeats जिणइ जअइ जयति।

दुहि-लिहि-वहां दुब्भ-लिब्भ-वुब्भाः ॥ ६४ ॥

भावे कर्मणि चार्थे दुहादीनां त्रयाणां स्थाने यथाक्रमं दुब्भ-लिब्भ-वुब्भा भवन्ति। दुब्भइ दुह्यते। लिब्भइ लिह्यते। वुब्भइ उह्यते। वेत्येके। दुब्भइ दुहिज्जइ दुहिअइ इत्यादि ॥

हृञ्-कृञोर्हीर-कीरौ ॥ ६५ ॥

भावे कर्मणि चार्थे हीर कीर इत्येत्यौ भवतः। हीरइ ह्रियते। कीरइ क्रियते। वेत्येके। हरीअइ हरिज्जइ। करीअइ करिज्जइ ॥

ज्ञो जाण-मुणौ[1] ॥ ६६ ॥

ज्ञा अवबोधन इत्यस्य स्थाने भावे कर्मणि च वाच्ये जाण मुण इत्येतावादेशौ भवतः। जाणेइ मुणेइ ज्ञायते। वेत्येके। जाणिअइ जाणिज्जइ। आणअइ आणज्जइ। णादेशेन णाइअइ णाइज्जइ ॥

ग्रहेर्घेप्पः ॥ ६७ ॥

भावे कर्मणि चार्थे ग्रहे स्थाने घेप्पो भवति। घेप्पइ गृह्यते। वेत्येके। गेन्हिअइ गेन्हिज्जइ ॥

क्तेन दिण्णादयः ॥ ६८ ॥

क्त-प्रत्ययेन सह डुदाञ् दान इत्यादीनां स्थाने दिण्ण इत्यादय आदेशा निपात्यन्ते। निपातनादिष्टसिद्धिः। तथा चोक्तम्—

दत्त-मुक्त-व्यतिक्रान्त-त्रस्तानां रुदितस्य च।
दिण्णं मुक्कं वक्कोवाणं हिक्कं रुण्णं भवन्त्यमी ॥ १ ॥
दृष्ट-दग्धार्जित-ख्यात-स्थापितानामिमे मताः।
डक्कं दड्ढं विढत्तं च संखाअं थविअं तथा ॥ २ ॥
स्पृष्टास्वादित-नष्टानां स्यात् प्रतारित-लूनयोः।
छिविअं चक्खिअं लुक्कं तथा विलविअं लुअं ॥ ३ ॥

1. In A the writing of this sūtra looks like ज्ञो णज्ज-णव्वौ वा ॥ But I have emended it as above on the strength of other texts.

आरब्धार्पितयोः स्यातां आढत्तं च विणाविअं।
एवं दिण्णादयोऽन्येऽपि दत्तादीनां निपतिताः ॥ ४ ॥

तक्षे रंप-वञ्छौ ॥ ६९ ॥

तक्ष तनूकरण इत्यस्य स्थाने रंप वञ्छ इत्येतावादेशौ भवतः। रंपइ वञ्छइ तक्षति तक्ष्णोति वा ॥

खिदेर्विसूरः ॥ ७० ॥

खिद दैन्य इत्यस्य स्थाने विसूर इत्यादेशो भवति। विसूरइ विसूरेइ विसूरए खिद्यते। बहुलानुवृत्तेः खिज्जइ इत्यपि।

क्रुधेर्जूरः ॥ ७१ ॥

क्रुध कोप इत्यस्य स्थाने जूरादेशो भवति। जूरइ क्रुध्यति। जूरन्तो क्रुध्यन्॥

चर्चेश्चरः ॥ ७२ ॥

चर्च अध्ययन इत्यस्य स्थाने चर आदेशो भवति। चरइ चर्चयति। वक्तीत्यर्थः। चरिज्जइ चर्च्यते ॥

त्रसेर्वज्जः ॥ ७३ ॥

त्रसि उद्वेग इत्यस्य स्थाने वज्जादेशो भवति। वज्जइ त्रस्यति त्रसति वा ॥

मृजेर्लुभ-पुंसौ ॥ ७४ ॥

मृजूष् शुद्धावित्यस्य स्थाने लुभ-पुंस इत्येतावादेशौ भवतः। लुभइ पुंसइ मार्ष्टि ॥

मज्जे र्वुड्ड-खुप्पौ ॥ ७५ ॥

टुमस्जो शुद्धावित्यस्य स्थाने वुड्ड-खुप्प इत्येतावादेशौ भवतः। वुड्डइ खुप्पइ मज्जति। वुड्डिअ खुप्पिस मङ्क्त्वा। वुड्डइ इत्यादिषु न ढ निमज्जन इत्यस्य रूपम् ॥

दृशेः पुलअ-णिअच्छ-अवक्ख-सच्चवाः ॥ ७६ ॥

दृशिर् प्रेक्षण इत्यस्य स्थाने पुलअ णिअच्छ अवक्ख सच्चव इत्येते चत्वार आदेशा भवन्ति। पुलअइ णिअच्छइ अवक्खइ सच्चवइ पश्यति। पलोएइ इति लोके दर्शन इत्यस्य णिजन्तस्य रूपम् ॥

शकेस्तर-वअ-तीराः ॥ ७७ ॥

शक्लृ शक्तावित्यस्य स्थाने तर वअ तीर इत्येते आदेशा भवन्ति। तरइ वअइ तीरइ शक्नोति। तरिज्जइ शक्यते।

एवमन्येऽपि ॥ ७८ ॥

शिष्टानुशिष्ट-दर्शनाद् एवं पूर्वोक्तप्रकारेण यथैव भू सत्तायामित्यादीनां हो-हुवादयो विहितास्तथान्येषामप्यन्ये ऊह्या भवन्ति। एतेनायमर्थः। लम्ब्यादीनां थक्कादयः। वि-उपसर्गसहित-लवि विथक्कइ विलम्ब्यते। आस अच्छइ आस्ते। क्षिप् छुह छुहइ क्षिपति। वाञ्छि महइ वंछइ वाञ्छति। आङ्-श्रिञ् अणिअइ आश्रयति। गुप् णूमेइ गोपायति। जि जअइ जयति। स्थग ढक्कइ स्थगयति। प्र-पूर्व हि गतौ वृद्धौ च। पिणुवइ प्रहिणोति। भुज जेमइ भुङ्क्ते। क्वचिद्वा। विलम्बेइ विलम्बते। खिवइ क्षिपति। जिणइ जयति। भाव-कर्मणोरपि। दीसइ दृश्यते इति च। आप्पेइ आरभ्यते। विढप्पइ अर्ज्यते। इत्यादयोऽप्यत्रोन्नेयाः। क्त्वायामपि। थक्कऊण विलम्ब्य। एवं अच्छऊण क्षिप्त्वा। चक्किऊण स्थगयित्वा इत्यादयः। क्त-प्रत्ययेऽपि। णूमिअं गोपायितम्। एवं महिअं वाञ्छितम्। चक्किअं स्थगितम्। पिणुविअं प्रहितम्। इत्यादयो यथा-दर्शनं प्रत्ययान्तरेष्वपि धात्वन्तराणामपि आदेशा ऊह्याः। केचिदेवमन्येऽपीति क्रियापदविषयमेवाचक्षते ॥

शेषाणामदन्तता ॥ ७९ ॥

अदन्ततादेशाः शेषाः। शेषाणां हलन्तानां धातूनामकारान्तता भवति। हसेइ हसति। हसिओ हसितः। हसिऊण हसित्वा। अहअं रूसामि अहं रुष्यामि। लहामो लभामहे। रमए रमते॥

अनतामचां वा ॥ ८० ॥

अनदन्तानामजन्तानाम् अकारागमो भवति। होइ होअइ भवति। भाइ भाअइ बिभेति। अनतामिति किम्? हुवइ भवति। बिहइ बिभेति।

उक्तादेशा अनुक्ताजादेशाश्च बहुलम् ॥ ८१ ॥

क्वचित् प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद् विभाषा क्वचिदन्यदेव।
विधेर्विधानं बहुधा समीक्ष्य चतुर्विधं बाहुलकं वदन्ति॥

भुवो हो-हुवादयो ये आदेशा उक्ता अवां स्थाने ये आदेशा अनुक्तास्तेऽपि बहुलं भवन्ति। धावइ धुवइ धावति। अत्राकारस्योकारः। सोवइ सुवइ स्वपिति। अत्राप्यकारस्योकारः। एइ एति। अत्राकारस्यैकारः। देइ ददाति। अत्राकारस्यैकारः। णेइ नयति। अत्रेकारस्य एत्वम्। रोवइ रुवइ रोदिति। अत्रोकारस्यौत्त्वम्। णासइ नश्यति। अत्राकास्यात्वम्॥

उक्तादेशविभाषा यथा। सरइ स्मरति। मज्जइ मज्जति। तच्छइ तक्ष्नोति। सक्कइ शक्नोति। इत्यादि।

अपूर्वविधानं यथा। ठाऊण स्थित्वा। झाऊण ध्यात्वा। गाऊण गीत्वा। ठाउं स्थातुम्। झाउं ध्यातुम्। गाउं गातुम्। ठाअव्वं स्थातव्यम्। झाअव्वं ध्यातव्यम्। गाअव्वं गातव्यम्। एवमन्यदप्यूह्यम्। उक्तञ्च—

सर्वैवैषा प्रयोक्तव्या भाषा वृद्धानुसारतः।
बाल-व्युत्पत्ति-दिङ्मात्र-दर्शनार्थं तु लक्षणम्॥ इति॥

इति विद्याविनोदाचार्यकृतौ प्राकृतपादे सप्तमः परिच्छेदः॥

अष्टमः परिच्छेदः

अथाव्ययविधिः

कीस किमर्थेऽव्ययम् ॥ १ ॥

अव्ययमित्यधिकारः। किं शब्दार्थे कीस इति वर्तते। तदव्ययम्। कीस तुए मह कहिअं किं त्वया मम कथितम् ॥

हुं दान-पृच्छा-निवारणेषु ॥ २ ॥

दाने पृच्छायां निवारणे चार्थे द्योत्ये हुं इति वर्तते। तदव्ययम्। हुं देअर गेण्ह हे देवर गृहाण। अत्र दानार्थं द्योतयति। हुं भण त्वं भण। अत्र पृच्छा द्योतयति। हुं होसु तुण्हिक्को भव तूष्णीकः। अत्र निषेधार्थं द्योतयति। अव्ययं क्वचिद् वाचकं क्वचिद् द्योतकमिति यथास्थान-मवगन्तव्यम् ॥

च्चिअ च्चेअ अवधारणे ॥ ३ ॥

अवधारणे अर्थे च्चिअं च्चेअं इत्येते वर्तेते। एते अव्यये। एसो च्चिअ स राआ एष एव स राजा इति निश्चयः। स च्चेअं इअं महाणअरी सा एव-इयं महानगरी अन्या न भवतीति निश्चयः।

ओ सूचना-पश्चात्ताप-विकल्पेषु ॥ ४ ॥

साभिप्रायोपदेशकथनेऽनुशये पक्षान्तरे च द्योत्ये ओ इति वर्तते। तदव्ययम्। ओ अविणअ जत्तवई अविनय-यत्नवती। अत्र ओ-शब्दः पूर्वकृत-स्वकीयोपकरणीय-सूचकत्वं द्योतयति। गुण-प्पसण्णामि किमित्यहं गुणप्रसन्ना-स्मीत्येवं योऽनुशयन्तं द्योतयति ओ अणुणेमि इत्यत्र विकल्पार्थं द्योतयति ॥

इर-किर-किला अनिश्चयाख्यानेषु ॥ ५ ॥

इर किर किल इत्येते त्रयोऽपि निश्चयाख्यापने वर्तन्ते। तान्यव्ययानि। इह इर दिट्ठो दइओ। इह किल दृष्टो दयितः। अत्र इर-शब्दः ध्यानदर्शनादेव

निश्चितार्थं वक्ति। एत्थ किर आलिंगिओ। एतस्मिन् किल आलिङ्गितः। अत्र किरशब्दः स्थानस्य आलिङ्गनस्य वा सम्यगर्थतां कथयति। ण किल रमिओ। न किल रमितः। अत्र किल शब्दः रमितार्थ-निषेधार्थस्य विस्फुटतां प्रतिपादयति ।।

हु क्खु निश्चय-वितर्क-सम्भावनासु ॥ ६ ॥

निश्चयो नियमः। वितर्को विमर्शः। सम्भावनाऽध्यवसायः। एते-ष्वर्थेषु हु क्खु इत्येते वर्तेते। एते अव्यये। अज्ज हु दीसइ दइआ। अद्य खलु दृश्यते दयिता। अत्र हुशब्दो दर्शननिश्चयं वक्ति। अज्ज क्खु एसा मं पलोएइ। अद्य खलु एषा मां प्रलोकयति। अत्र क्खुशब्दो विलोकननिश्चयं वक्ति। ण हु दिट्ठो तइ अज्जावि। न खलु दृष्टस्त्वया अद्यापि। अत्र हुशब्दो दर्शनविमर्शं विलोकयति। पेच्छ क्खु दारम्मि सो ओ होज्ज। प्रेक्षस्व द्वारे मा कर्हिचित् स्थितो भविष्यामि। अत्र क्खु शब्दो द्वारदेशावस्थिति-विमर्शोत्पत्तिद्योतकः। अच्छउ ताव हु णइए। आस्तां तावत् खलु नद्याः। अत्र हु-शब्दो नदीपारगमनातिक्रम-सम्भावनां द्योतयति। खणा क्खु वच्चामि जलणिहिणो पारं। क्षणात् खलु व्रजामि जलनिधेः पारम्। अत्र क्खु शब्दो जलनिधिपारप्राप्त्यवसायद्योतकः ॥

इजेराः पादपूरणे ॥ ७ ॥

पादपूरणे इजेरा इत्येते वर्तन्ते। तान्यव्ययानि। एस इ तहा पअट्टो। एष तथा प्रवृत्तः। अत्र इ-शब्दोऽन्यूनपादपूरणे ॥

णवर केवले ॥ ८ ॥

केवलेऽर्थे णवर इति वर्तते। तदव्ययम्। णवर धणड्ढो एसो। एष धनाढ्य एवेत्यर्थः ॥

णवर्य्यानन्तर्ये ॥ ९ ॥

आनन्तर्ये णवरीति वर्तते। तदव्ययम्। णवरि छिण्णं सीसं रिउणो। अनन्तरं छिन्नं शीर्षं रिपोः ॥

उ क्षेप-विस्मय-सूचनासु ॥ १० ॥

क्षेपस्तिरस्कारः। विस्मय आश्चर्यम्। सूचनाभिप्रायपैशुन्यम्। एष्वर्थेषु उ इति वर्तते। तदव्ययम्। उणअत्थ तेण कज्जं। नास्माकं तेन कार्यम्। प्रयोजने सत्यपि प्रयोजनं नास्तीत्यधिक्षेपः। तम् उकारो द्योतयति। उ सो एस इह कुदो[1] आअदो। स एष कस्माद् आगतः। इत्यादावाश्चर्यं उकारो द्योतयति। सहि उ विलक्खो व्व। सखि विलक्ष इव। अत्र वैलक्ष्य-जन्म-कारणाभिप्रायो द्योतनार्थ उशब्दः ॥

किणो प्रश्ने ॥ ११ ॥

किणो इति प्रश्नेऽर्थे वर्तते। तदव्ययम्। सुअह किणो कहसि मं। सुभग किं कथयसि माम्। अत्र किणोशब्दः प्रश्नार्थवाचकः ॥

अव्वो दुःख-सूचना-सम्भाषणेषु ॥ १२ ॥

दुःखे सूचनायां सम्भाषणे चार्थे अव्वो इति वर्तते। तदव्ययम्। अव्वो मह पियविरहो। मम प्रियविरहः। अत्र अव्वोशब्दः प्रियविरहदुःखस्य द्योतकः। अव्वो वाणिगणि। अव्वोशब्दस्तदूगतनैष्ठुर्य-पैशुन्यपरः। कहिसि सहि अव्वो। क्वासि सखि। अत्र अव्वोशब्दः[2] सख्या सह यत् सम्भाषणं तदर्थद्योतकद्वारेण प्रयुक्तः। अव्वो इति निपातोऽत्र दृश्यते क्वापि विस्मय इति वररुचिः ॥

---

1. कुदो आसदो is omitted by A. But as the Sanskrit rendering contains this, I have supplied it on the strength of Vasantarāja.

2. After this A has प्रियविरह दुःखस्य द्योतकः अव्वो।

अलाहि निवारणे ॥ १३ ॥

अलाहि इति त्र्यक्षरं निवारणे[1] सम्भावने निरूपणेऽर्थे वर्तते। तद् अव्ययम्।

अइ रणे संभाषणे ॥ १४ ॥

अइ रणे इत्येतौ संभाषणे निरूपणेऽर्थे वर्तेते। अइ पिअअम छणं दिसहो। अयि प्रियतमक्षणं दिवसः। अत्र संभाषणम् अइ शब्दः। अज्ज रणे णाह गम्मइ घराउ। अद्य नाथ गम्यते गृहात्। अत्र रणे शब्दो गमनस्य [सम्भाषणं][2] निरूपयति ॥

वे व्व आमन्त्रणे ॥ १५ ॥

वे व्व इत्यक्षरम् आमन्त्रणे संबोधनेऽर्थे वर्तते। तदव्ययम्। वे व्व देअर जानसु। हे देवर जानीहि। अत्र वेव्व शब्द आमन्त्रणार्थं द्योतयति ॥

खु कुत्सायाम् ॥ १६ ॥

खु इति निन्दायां वर्तते। तदव्ययम्। खु तुह सवत्तिचरिअं। धिक् तव सपत्नीचरितम्। अत्र खु शब्दः सपत्नीचरितस्य निन्दने वर्तते।

रे अरे हरे संभाषण-रतिकलह-क्षेपेषु ॥ १७ ॥

सम्भाषणं जल्पनम्। रतिकलहः निधुवनकेलिः। क्षेपस्तिरस्कारः। एष्वर्थेषु यथासंख्यं रे अरे हरे इत्येते त्रयो वर्तन्ते। तान्यव्ययानि। रे णिहुअं जं जं पसि। रे निभृतं यत् जल्पसि। रे-शब्दोऽत्र संभाषणद्योतकः। देहि अरे निवसणं। देहि अरे निवसनम्। अत्र अरे-शब्दः परिधने-प्रार्थनाभिप्रायेण रतिकलहद्योतकतामावहति। हले धट्ठो, अहो धृष्टः। अत्र हरे शब्दः क्षिप्त्वलक्षणमुन्मीलयति ॥

---

1. After this A has इत्येतौ। 2. Supplied by me. Not found in Ms.

पिव मिव विव इवार्थे ॥ १८ ॥

इवार्थे उपमायामुत्प्रेक्षायाञ्च पिव मिव विव इत्येते वर्तन्ते। तान्यव्ययानि। रंभापिव रूपेण। रम्भेव रूपेण। हरिणीमिव तरल-पेच्छिअव्वेण। हरिणीव तरल-प्रेक्षितव्येन। हंसीविव गमनेन। हंसीव गमनेन। एवमादयोऽन्येऽपि। एवंविधान्यन्यान्यपि अव्ययानि भवन्ति। तथाहि—

अनारम्भे च क्षेपे च पश्चात्ताप-विषादयोः।
निश्चये च बुधैः प्रोक्तो निपातो हन्त अव्ययम् ॥
हन्त वाच्यविभूषायां हे इत्यामन्त्रणे भवेत्।
आ-शब्दोऽस्मिन् भवत्यर्थे महानित्येवमर्थकः॥
हन्ते हञ्जे हलाशब्दास्त्रयः सम्बोधनार्थकाः।
इवार्थे ण इति क्षेपे दुही खेदानुतापयोः॥
अलं अलं विषादार्थावव्ययौ च मतावमू।
इअयं वेत्ययः शब्दः प्रोक्तश्चेतरथासमः॥
एवमादय इष्यन्ते चान्यै र्लक्ष्यानुसारतः।
च वा हहे अहो हंहो णमेआहो हही सिहो॥
होहसिहो होहविसो सुष्टु आआश्चवादयः।
इष्यन्ते इति केचित्तु शेषा ज्ञेयाः प्रयोगतः॥

शेषाः संस्कृतवत् ॥ १९ ॥

संस्कृतं समीक्ष्य संस्कृतादुक्तेऽर्थेऽन्ये शेषाः। सुप्-तिङ्-कृत्तद्धित-समास-प्रत्याहार-कारक-लिङ्ग-संख्यादयोऽत्र नोक्तास्ते संस्कृतं समीक्ष्यावगन्तव्याः। संस्कृतानुसारेण प्रवर्तनीया इति यावत्। उक्तञ्च—प्राकृतं संस्कृतयोनीति। संस्कृतन्तु पाणिन्यादि-मुनि-प्रणीत-शास्त्र-सिद्धम् ॥

इति विद्याविनोदाचार्यकृतौ प्राकृतपादेऽष्टमः परिच्छेदः॥

॥ समाप्तश्चायं ग्रन्थः ॥